श्मशानवासी मांसासी खर्पराशी स्मरान्तकः ॥ 2 ॥

ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं सर्वार्थसिद्धिदाय मनोवाञ्छाफलपूरणाय कुरु कुरु बटुकाय ह्रीं ॐ। इति वारद्वयं पठेत् ॥2॥

---

1. इसके पश्चात् ऋष्यादिन्यास, करन्यास, षडङ्गन्यास तथा ध्यान पूर्ववत् करके पाठ करें।

कङ्काल कालशमनः कलाकाष्ठतनुः कविः।
त्रिनेत्रो बहुनेत्रश्च तथा पिङ्गललोचनः ॥
नः चलोलङ्गपि थात श्चत्रनेहुब त्रोनेत्रि।
विःक नुःतष्ठकालाक नःमशलका लःङ्काक ॥
त्रिनेत्रो बहुनेत्रश्च तथा पिङ्गललोचनः।
कङ्काल कालशमनः कलाकाष्ठतनुः कवि ॥ 3 ॥

ऊँ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं सर्वार्थसिद्धिदाय मनोवाञ्छाफलपूरणाय कुरु कुरु बटुकाय ह्रीं ऊँ। इति वारद्वयं पठेत् ॥3॥

शूलपाणिः खड्गपाणि कङ्काली धूम्रलोचनः।
अभीरुर्भैरवीनाथो भूतपो योगिनीपतिः ॥
तिःपनीगियो पोतभू थोनावीरभैंरुभीअ।
नःचलोम्रधू लीङ्काक णिःपागड्ख णिःपालशू ॥
अभीरुर्भैरवीनाथो भूतपो योगिनीपतिः।
शूलपाणिः खड्गपाणिः कङ्कालो धूम्रलोचनः ॥ 4 ॥

ऊँ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं सर्वार्थसिद्धिदाय मनोवाञ्छाफलपूरणाय कुरु कुरु बटुकाय ह्रीं ऊँ। इति वारद्वयं पठेत्॥4॥

धनदोऽधनहारी च धनवान् प्रतिभानान्।
नागहारो नागपाशो व्योमकेश कपालभृत् ॥
त्भृलपाक शःकेमव्यो शोपागना रोहागना।
नूवानभातिप्र नूवानध्र च रीहानधऽदोनध ॥
नागहारो नागपाशो व्योमकेशः कपालभृत्।
धनदोऽधनहारी च धनवान् प्रतिभानवान् ॥ 5 ॥

ऊँ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं सर्वार्थसिद्धिदाय मनोवाञ्छाफलपूरणाय कुरु कुरु बटुकाय ह्रीं ऊँ। इति वारद्वयं पठेत् ॥5॥

कालः कपालमाली च कमनीय कलानिधिः।
त्रिलोचनो ज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपः ॥
पःकलोत्रि च खीर्शिस्त्रित्रन्नेलज्व नोचलोत्रि।
धिःनिलाक यःनीमक च लीमालपाक लःका ॥
त्रिलोचनो ज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपः।
कालः कपालमाली च कमनीयः कलानिधिः ॥ 6 ॥

ऊँ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं सर्वार्थसिद्धिदाय मनोवाञ्छाफलपूरणाय कुरु कुरु बटुकाय ह्रीं ऊँ। इति वारद्वयं पठेत् ॥6॥

त्रिनेत्रतनयो डिम्भशान्तः शान्तजनप्रियः।
बटुको बहुवेषश्च खट्वाङ्गवरधारकः ॥
कःरधारवङ्गवाट्ख श्चषवेहुब कोटुब।
यः प्रिनजन्तशा न्तःशाम्भडि योनतत्रनेत्रि ॥
बटुको बहुवेषश्च खट्वाङ्गवरधाकः।
त्रिनेत्रतनयो डिम्भशान्तः शान्तजनप्रियः ॥ 7 ॥

ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं सर्वार्थसिद्धिदाय मनोवाञ्छाफलपूरणाय कुरु कुरु बटुकाय ह्रीं ॐ। इति वारद्वयं पठेत् ॥7॥

भूताध्यक्षः पशुपतिर्भिक्षुकः परिचारकः।
धूर्तो दिगम्बरः शूरो हरिणः पाण्डुलोचनः ॥
नः चलोण्डुपा णःरिह रोशू रःम्बगदि र्तोधू।
कःरचारपि कःक्षुर्भितिपशुप क्षःध्यताभू ॥
धूर्तो दिगम्बरः शूरो हरिणः पाण्डुलोचनः।
भूताध्यक्षः पशुपतिर्भिक्षुकः परिचारकः ॥ 8 ॥

ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं सर्वार्थसिद्धिदाय मनोवाञ्छाफलपूरणाय कुरु कुरु बटुकाय ह्रीं ॐ। इति वारद्वयं पठेत् ॥8॥

प्रशान्तः शान्तिदः शुद्धः शङ्करप्रियबान्धवः।
अष्टमूर्तिर्निधीशश्च ज्ञानचक्षुस्तपोमयः ॥
यः मपोस्तक्षुचनज्ञा श्चशधीर्निर्तिमूष्टअ।
वःन्धबायप्रिरङ्कश द्धःशु दःन्तिशा न्तःशाप्र॥
अष्टमूर्तिर्निधीशश्च ज्ञानचक्षुस्तपोमयः।
प्रशान्तः शान्तिदः शुद्धः शङ्करप्रियबान्धवः ॥ 9 ॥

ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं सर्वार्थसिद्धिदाय मनोवाञ्छाफलपूरणाय कुरु कुरु बटुकाय ह्रीं ॐ। इति वारद्वयं पठेत् ॥9॥

अष्टाधारः षडाधारः सर्पयुक्तः शिखीसखः।
भूधरो भूधराधीशो भूततिर्भूधरात्मजः ॥
जः त्मराधर्भूतिपभू शोधीराधभू रोधभू।
खः सखीशि क्तःयुर्पस रःधाडाष रःधाष्टाअ ॥
भूधरो भूधराधीशो भूपतिर्भूधरात्मजः।
अष्टाधारः षडाधारः सर्पयुक्तः शिखीसखः ॥ 10 ॥

ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं सर्वार्थसिद्धिदाय मनोवाञ्छाफलपूरणाय कुरु कुरु बटुकाय ह्रीं ॐ। इति वारद्वयं पठेत् ॥10॥

कङ्कालधारी मुण्डी च आन्त्रज्ञोपवीतवान्।
जृम्भणो मोहनः स्तम्भी मारणः क्षोभणस्तथा ॥
थास्तणभक्षो णःरमा म्भीस्त नःहमो णोम्भजृ।
न्वातवीपज्ञोयन्त्रआ च ण्डीमु रीधालङ्काक ॥
जृम्भणो मोहनः स्तम्भी मारणः क्षोभणस्तथा।
कङ्कालधारी मुण्डी च आन्त्रयज्ञोपवीतवान् ॥ 11 ॥

ऊँ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं सर्वार्थसिद्धिदाय मनोवाञ्छाफलपूरणाय कुरु कुरु बटुकाय ह्रीं ऊँ। इति वारद्वयं पठेत् ॥11॥

शुद्धनीलाञ्जनप्रख्यो दैत्यहा मुण्डभूषितः।
बलिभुग् बलिभुङ्नाथो बालोऽबालपराक्रमः ॥
मःक्रपालबाऽलोबा थोनाङ्भुलिब गभुलिब।
तः षिभूण्डमु हात्यदै ख्योप्रनञ्जलानीद्धशु ॥
बलिभुग् बलिभुङ्नाथो बालोऽबालपराक्रमः।
शुद्धनीलञ्जनप्रख्यो दैत्यहा मुण्डभूषितः ॥ 12 ॥

ऊँ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं सर्वार्थसिद्धिदाय मनोवाञ्छाफलपूरणाय कुरु कुरु बटुकाय ह्रीं ऊँ। इति वारद्वयं पठेत् ॥12॥

सर्वापत्तारणो दुर्गो दुष्टभूतनिषेवितः।
कामी कलानिधिकान्तः कामिनीवशकृद वशी ॥
शीद्वकृशशवनीमिका न्तःकाधिनिलाक मोका।
तः विषेनितभूष्टदु र्गोदु णोरत्तापर्वास ॥
कामी कलानिधिकान्तः कामिनीवशकृद्वशी।
सर्वापत्तारणो दुर्गो दुष्टभूतनिषेवितः ॥ 13 ॥

ऊँ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं सर्वार्थसिद्धिदाय मनोवाञ्छाफलपूरणाय कुरु कुरु बटुकाय ह्रीं ऊँ। इति वारद्वयं पठेत् ॥13॥

जगद्रक्षाकरोऽनन्तो मायामन्त्रौषधीमयः
सर्वसिद्धिप्रदो वैद्यः प्रभविष्णुरितीव हि ॥
यः मधीषन्त्रौमयामा न्तोनऽरोकक्षाद्रगज।
हि वतीरिष्णुविभप्र द्यःवै दोप्रद्धिसिर्वस ॥
सर्वसिद्धिप्रदो वैद्यः प्रभविष्णुरितीव हि।
जगद्रक्षाकरोऽनन्तो मायामन्त्रौषधीमयः ॥ 14 ॥

ऊँ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं सर्वार्थसिद्धिदाय मनोवाञ्छाफलपूरणाय कुरु कुरु बटुकाय ह्रीं ऊँ। इति वारद्वयं पठेत् ॥14॥

श्रीबटुक भैरव अष्टोत्तरशत-नामावली

(हिन्दी पाठ)

सात्त्विक ध्यान[1]

स्फटिक सरिस सुन्दर तन राजै। कुण्डल मणि आभा मुख साजै ॥
दिव्य किंकिणी मणि मंजीरा। नूपुर शोभित चरण सुधीरा ॥
दिव्य क्रान्ति चहुं दिग् बगरावै। विषद वसन सुषुमा मन भावै ॥
परम प्रसन्न बटुक शुभ रूपा। तीन नयन अति दिव्य अनूपा ॥
शूल दण्ड दोउ भुजनि विराजै। करि दर्शन हिय कहँ दुख भाजै ॥
भक्त इष्टप्रद भैरव नाथा। पुनि पुनि प्रभो नवारौं माथा ॥

तामस ध्यान

नील अद्रि सम सुन्दर रूपा। शशिलेखा शृंगार अनूपा ॥
गल मुण्डमाला मनोहर वेशा। दिव्य दिगम्बर पिङ्गल केशा ॥
डमरु खड्ग शृणि पाश विराजै। अभय नाग घण्टा शुभ राजै ॥
कर-कपाल सरसीरुह सोहै। छवि निखरत त्रिभुवन मन मौहे ॥
दंष्ट्राभीम वक्त्र छवि पावै। नाग यज्ञ उपवीत सुहावै ॥
तीन नयन जग अनुपम दानी। मणि किंकिणि नूपुर छवि खानि ॥
धरौ ध्यान तब सहज कृपाला। हरहु नाथ हिय कहं दुख जाला ॥

राजस ध्यान

उदित सूर्य सम अरुण स्वरूपा। त्रिनयन सुषुमा परम अनूपा ॥
रक्त सुरंजित शुभ अंगरागा। रक्त मालय शोभित उरभागा ॥
मन्द हास्ययुत मुख छवि राजै। वरदरूप सुषुमा हिय साजै ॥
शूल कपाल करनि शुभ सोहै। मुद्रा अभय भक्त मनं मोहे ॥
नीलकण्ठ शुभ भूषणधारी। चन्द्रचूड सुषुमा मन हारी ॥
बन्धूकारुण वसन सुहावै। भक्त भीर हरि हिय सरसावै ॥
भजौं तोहिं भैरव महाराजा। पूरउ नाथ सकल हिय काजा ॥

---

1. जिस प्रकार संस्कृत के अनेक प्रकार से ध्यान दिए हैं, वैसे ही हिन्दी में भी दिए हैं। इनमें से कार्य और कामना के अनुसार कोई एक ध्यान करके पाठ करें।

अष्टादश-भुज-ध्यान

शुभ्र कान्तिमय रूप अनूपा। अष्टादश भुज शोभित रूपा ॥
पञ्च वक्त्र अनुपम छवि शोभा। तीन नयन सुषुमा मन लोभा ॥
मुद्रा ज्ञान कञ्जकर साजै। अपर हस्त में व्रज विराजै ॥
भेषज शंख चाप कर मांहीं। शूल खट्वाङ्ग बाण छवि पाहीं ॥
डमरु गदा असि चक्र मनोहर। पाश त्रिशूल मुण्ड कर सुन्दर ॥
होई मुदित पल में अपनावै। भक्त इष्टप्रद रूप दिखावै ॥
नमो-नमो भैरव बलवाना। अरिकुल मारि देउ वरदाना ॥
जय-जय भैरव सब सिधि दायक। भक्त इष्ट पूरक सब लायक ॥

दशभुज-ध्यान

पद्मासन आसीन कृपाला। परम शान्ति छवि दीन दयाला ॥
चन्द्र मुकुट शुभ सीस विराजै। मुण्डमाल छवि उर विच साजै ॥
तीन नयन सुषुमा अति सोहै। अनुपम छवि त्रिभुवन मन मोहे ॥
शूल खड्ग अरु वज्र विराजै। परशु मुसल दक्षिण कर राजै ॥
नाग घण्ट सुकपाल सुहावै। नलिन पाश अंकुश छवि छावै ॥
नाना भूषण भूषित झाँकी। स्फटिकोपक सुषुमा अति बाँकी ॥
विश्वाकर्षक शिव सिर नाऔं। करहु कृपा पद-पङ्कज ध्याऔं ॥

अष्टभुज-ध्यान

शुद्ध स्फटिक सरिस शुभ भासै। सहस सूर्यसम दीप्ति प्रकासै ॥
नील मेघ सम वर्ण विराजै। नीलाञ्जन सम प्रभा सुसाजै ॥
आठ भुजा दृग तीन विराजै। भुजा चार युग भुजसौं भ्राजै ॥
दन्तुर वदन परम शुभ सौहे। नूपुर धुनि सौं त्रिभुवन मोहैं ॥
भुजग मेखला परम सुहाई। अग्निवर्ण शिख हृदय लुभाई ॥
दिग्-अम्बर सब बालक राजा। अति बलवन्त बटुक महाराजा ॥
कर खट्वाङ्ग-पाश-असि राजै। दक्षिण में शुभ शूल विराजै ॥
डमरु कपाल भुजग वरदाना। अनल सरिस शुभ तेज निधाना ॥
सारमेय वाहन संग सौहे। ध्यान धरत त्रिभुवन मन मोहै ॥
सकल कामना तुरत पुरावैं। जै निज हियमहं बटुकहिं ध्यावैं ॥

द्विभुज-ध्यान

कर कपाल शुभ सुन्दर राजै। कुण्डल कर्ण दण्ड कर साजै ॥
तरुण तिमिर सम नील स्वरूपा। व्याल यज्ञ-उपवीत अनूपा ॥
विघ्ननाशि मखरक्षक पूरे। साधु सिद्धिप्रद रण अति शूरे ॥
जय-जय बटुकनाथ सिद्धि दायक। कृपासिन्धु प्रभु भक्त सहायक ॥

नामावली पाठ

नमो-नमो भैरव सिधि दाता। भूतनाथ भव भयतें त्राता ॥
भूतात्मा भूतल उजियारे। बटुक भूत-भावन मतवारे ॥1॥
क्षेत्रद क्षेत्रपाल सुरराटा। क्षत्रियवर क्षेत्रज्ञ विराटा ॥
जय श्मशानवासी शुभनामा। मांसाशी प्रभु मंगलधामा ॥2॥
नमो खर्पराशी भगवन्ता। जय स्मरान्तक रूप अनन्ता ॥
हे खरान्तक अतिबलवाना। हे मखान्तक सर्वसुज़ाना ॥3॥
रक्तप तोहि बहुरि सिरनाऔं। पानप-सिद्ध हृदय महँ ध्याऔं ॥
रक्तपान तत्पर बलि जाऔं। पुनि-पुनि प्रभु तोहि सीस नवाऔं ॥4॥
सिद्धिद देव सिद्धि के नाथा। सिद्ध सुसेवित सेवक साथा ॥
जय कङ्काल कुटिल पर नाशी। कलशमन जय सब सुख राशी ॥5॥
नमो कलाकाष्ठा-तनुधारी। जय-जय कवि सर्वज्ञ सुखारी ॥
जय त्रिनेत्र बहुनेत्र नमामि। पिङ्गललोचन शरण व्रजामि ॥6॥
शूलपाणि जय दीन दयाला। खड्गपाणि जय परम कृपाला ॥
कङ्काली तोहि कोटि प्रणामा। जयतु धूम्रलोचन शुभ नामा ॥7॥
जय अभीरु जय भैरव नाथा। भूतप योगिनिपति शुचि गाथा ॥
नमो धनद धनहारी देवा। जय धनवान विश्वसुख देवा ॥8॥
जय प्रतिभानवान सुरस्वामी। जय प्रतिभावित अन्तर्यामि ॥
नागहार तव चरण नमामि। देव! दयामय सदा भजामि ॥9॥
नागपाश जय-जय सुरसांई। व्योमकेश जय प्रभो गुसांई ॥
नागकेश जय-जय सुरराया। कीजै नाथ भक्त पे दाया ॥10॥
जय कपालभृत्, काल कराला। जय कपालमाली जगपाला ॥
जय कमनीय कालानिधि त्राता। जयतु त्रिलोचन आनन्ददाता ॥11॥
ज्वलन्नेत्र त्रिशिखी तोहि ध्याऔं। नमो त्रिलोकप सब सिधि पाऔं ॥
जय त्रिनेत्रतनय सुखराशी। जय हे डिम्भ! नित्य अविनाशी ॥12॥

जय हे शान्त! भक्त वरदाई। डिम्भशान्त प्रभु भक्त सहाई ॥
शान्त जनप्रिय दीन दयाला। नमो बटुक बहुवेष कृपाला ॥13॥
जय खट्वाङ्गवरधारक देवा। भूताध्यक्ष करैं सुख सेवा ॥
जय-जय पशुपति भिक्षुक देवा। जय परिचारक जन-मन-मेवा ॥14॥
जय परिवारक जग के स्वामी। तुम कहँ बारम्बार नमामि ॥
धूर्त दिगम्बर शूर भजामि। हरिण पाण्डुलोचन जय स्वामी ॥15॥
जय प्रशान्त हे शान्तिद शुद्धा। सिद्ध युद्ध-जयकारी बुद्धा ॥
हे शंकरप्रियबान्धव नामी। शंकरप्रिय-बान्धव शुभ कामी ॥16॥
अष्टमूर्ति जय देव निधीशा। ज्ञानचक्षु तपोमय ईशा ॥
अष्टाधार नामो सुर स्वामी। षडाधार जग अन्तर्यामी ॥17॥
सर्पयुक्त शिखिसख भूधर जय। जय भूधर अधीश मंगलमय ॥
भूपति भूधर आत्मज दाता। भूधर आत्मक सब जग त्राता ॥18॥
जय कङ्कालधारि सुरनाथा। मुण्डी तोहि नवावौं माथा ॥
नाग यज्ञ-उपवीत विराजै। आन्त्रयज्ञ उपवीत सुसाजै ॥19॥
जृम्भण मोहन स्तम्भन स्वामी। मारण क्षोभण जगसुख कामी ॥
हे गुरुदेव ज्ञान के दाता। भोग मोक्षप्रद कृपा विधाता ॥20॥
शुद्ध नील अञ्जन प्रख्याता। देव दैत्यहा सेवक त्राता ॥
मुण्ड विभूषित छवि सरसाये। सकल सुमङ्गल मूल सुहाये ॥21॥
बलिभुक् तुम प्रभु बलिभुङ् नाथा। बाल अबाल पराक्रम साथा ॥
जय सर्वापत्तारण स्वामी। दुर्गरूप प्रभु अन्तर्यामी ॥22॥
दुष्ट भूत-निषेवित देवा। कामी कामफलप्रद सेवा ॥
जयतु कलानिधि कान्त सुनामी। कामिनीवशकृत तोहि नमामि ॥23॥
सकल जगत वशीकृत नामा। कामिनिवशकृत वशी ललामा ॥
देव जगत रक्षा कर जय-जय। अनन्त माया मन्त्रौषधि-मय ॥24॥
सर्व सिद्धिप्रद वैद्य महाना। हे प्रभु विष्णु विवेक निधाना ॥
तुम विभु अखिल-विश्व सरसाओ। भक्त भरण करि सुयश कमाओ ॥25॥
अष्टोत्तर शतनाम स्वरूपा। कल्पवृक्ष यह परम अनूपा ॥
जपत जीव सब मंगल पावै। सकल कामना तुरत पुरावै ॥26॥
दुरित भूत भय मारी भीति। जपत मिटै पल में सब ईती ॥
राज शत्रु ग्रह भय नहिं लागै। भैरव स्तवन करत दुख भागै ॥27॥
अष्टोत्तर शत नाम शुभ, जपत धरै नित ध्यान।
तिनकहँ भैरव लाडिले, सदा करैं कल्याण ॥28॥

श्रीबटुकभैरव अष्टोत्तरशत-नामावली

(अनुलोम-विलोम-रूप हिन्दी पाठ)

प्रार्थना

महादेव के परम प्रिय, भैरव नाथ महान।
पूर्ण-कृपा मुझ पर करो, दास आपका जान ॥1॥
बारम्बार प्रणाम कर, चरण-धूरि शिरधार।
अष्टोत्तर-शत-नाम का, सुमरण करूं पुकार ॥2॥

सामान्य-ध्यान

सुन्दर-भव्य प्रतापी-आनन। गौर-वर्ण-छवि कुण्डल कानन ॥
नर-कपाल कर में अति सोहै। अहि-उपवीत देखि मन मोहैं ॥
कटि-किंकिणि वद-गूधर बाजै। आन्त्र-माल-वैजन्ति विराजै ॥
देखत दुष्ट-दैत्य घबरावें। भक्त चरण में शीश नवावैं ॥
सकल-मनोरथ-पूरक स्वामी। बार बार वर मांगहुँ नामी! ॥
शीघ्र दया-कर मम-सुधि लीजे। चरण-सरण दे कारज कीजे ॥

विशेष-ध्यान

नील-वर्ण अति-उज्ज्वलरूपा। अष्टादश-भुज परम-अनूपा ॥
पंचानन छबि अद्भुत राजै। बाल-प्रताप-पौरुष अति-साजै ॥
नेत्र-त्रय अति-सुन्दर सोहैं। दैत्य भयंकर जन-मन मोहैं ॥
पंकज-वज्र-शंख-शर-शूला। डमरु-गदा-असि-चापनुकूला ॥
परशु-ज्ञान-मुद्रा मुँड-धारी। खट्वांगौषधि कर में डारी ॥
मुद्रा अभय चक्र अहि-पाशा। पान-पात्र शुचि करत प्रकाशा ॥
भक्त-जनों के परम कृपाला। दर्शन दे मेटें सब जाला ॥
सकल-मनोरथ-पूरक स्वामी। बार-बार तव चरण-नमामि ॥

अष्टोत्तर-शतनामावली

(1) अनुलोम-पाठ

भैरव[1] भूतनाथ[2] भूतात्मा[3]। भूतभावनः[4] क्षेत्रज्ञात्मा[5] ॥
क्षेत्रपाल[6] क्षेत्रद[7] क्षत्रिय[8]। विराट्[9] श्मशान-वासी[10] कमनीय ॥
मांसाशी[11] खर्पराशी[12] देवा। स्मरान्तकृत्[13] रक्तप[14] बहुसेवा ॥
पानप[15] सिद्ध[16] सिद्धिद[17] स्वामी। सिद्ध[18] सेवितः अन्तरयामी ॥
कंकालः[19] काल-शमनः[20] सुशूरे। कलाकाष्ठातनु[21] कवि[22] पूरे ॥
तीन-नेत्र[23] बहुनेत्र[24] प्रतापी। पिंगल-लोचन[25] शूलपाणि[26] जी ॥
खड्गपाणि[27] कंकालि[28] महाशय। धूम्रलोचनः[29] अभीरु[30] जय जय ॥
भैरविनाथ[31] भूतपः[32] पूरे। योगिनी-पति[33] धनदः[34] अति-शूरे ॥
अधनहारि[35] धनवान[36] महाशय। प्रतिभावान[37] नागहारी[38] जय ॥
नाग-पाश[39] तुम व्योमकेश[40] प्रभु। कपालभृत[41] हे काल[42] महाप्रभु ॥
कपालमाली[43] अति-कमनीया[44] कलानिधि[45] त्रय-लोचन[46] दीया ॥
ज्वलन्नेत्र[47] त्रिशिखी[48] त्रय-लोक-प[49]। तीन-नेत्र-सुत[50] डिम्भ-शांत[51] तप ॥
शांत-जन-प्रिय[52] बटुक[53] अतिवेशा[54]। खट्वांगीवरधारक[55] केशा ॥
भूताध्यक्ष[56] पशुपति[57] भिक्षुक[58]। परिचारक[59] अति धूर्त[60] दिगम्बर[61] ॥
शूर[62] हरिण[63] हे! पांडूलोचन[64]। पूर्ण प्रशान्त[65] शांतिदः[66] शोधन[67] ॥
शंकरप्रियबांधव[68] अठ मूरति[69]। हे निधीश[70]! हे ज्ञान[71] चक्षु! रति ॥
पूर्ण-तपोमय[72] अष्टाधारः[73]। षडाधार[74] सर्पयुक्त[75] भारः ॥
शिखी-सखा[76] भूधर[77] मतवारे। भूधरा-धीश[78] भूपति[79] प्यारे ॥
भूधरात्मज[80] कंकाल-धारी[81]। मुण्डी[82] आन्त्र-यज्ञोपवितारी[83] ॥
जृम्भण[84] मोहन[85] स्तम्भी[86] मारण[87]। क्षोभण[88] शुद्ध निलांजन प्रख्यण[89] ॥
दैत्यहारि[90] मुँडभूषित[91] बलिभुग[92]। बलिभुङ्गनाथ[93] बाल[94] सम संयुग ॥
अबाल पराक्रम[95] सर्वापतिहन[96]। दुर्ग[97] दुष्ट भूतनिषेवितन[98] ॥
कामी[99] कलानिधि[100] अति-कान्त[101]। कामिनीवशकृत[102] वशी सुशान्त ॥
जगरक्षाकर[103] अनन्त[104] स्वामी। माया मन्त्रौषधिमय[105]-नामी ॥
मम सब सिद्धिप्रद[106] हे! वैद्यः[107]। प्रभु-विष्णु[108] प्रसन्न हों सद्यः ॥

2. विलोम-पाठ

विष्णु[108] प्रभु हे! वैद्य[107] महाशय। मम सब-सिद्धिप्रद[106] हे! अति निर्भय ॥
मायामन्त्रोषधिमय[105] सुअनंता[104]। जग-रक्षा-कर[103] परम सुसन्ता ॥
कामिनी-वश-कृत[102] वशी[101] कान्त जय। कलानिधि[100] कामी[99]प्रभु अतिशय ॥
दुष्टभूत निषेवित[98] दुर्गः[97]। सर्वापत्तारण[96] अति सुर्गः ॥
अबालपराक्रम[95] बाल[94] बलीभुग्[93]। नाथ बलीभुङ्ग[92] अतिशय युग युग ॥
मुण्डभूषितः[91] दैत्यहा[90] शूरे। शुद्ध निलांजन[89] प्रख्य सुपूरे ॥
क्षोभण[88] मारण[87] स्तंभी[86] मोहन[85]। जृम्भण[84] आन्त्र यज्ञोपविती[83] धन ॥
मुंडी[82] कंकालधारी[81] सोहै। भूधरात्मज[80] भूपति[79] मोहै ॥॥
भूधर अधीश[78] भूधर[77] शिखि मित्रः[76]। सर्पयुक्त[75] षडाधार[74] विचित्रः ॥
अष्टाधार[73] तपोमय[72] पूरे। ज्ञान चक्षु[71] हे निधीश[70] शूरे ॥
अष्टमूर्ति[69] शंकर-प्रिय बांधव[68]। शुद्ध[67] शान्तिदः[66] प्रशान्त[65] साधव ॥
पांडु सुलोचन[64] हिरण[63] शूर[62] प्रभु। पूर्ण दिगम्बर[61] धूर्त[60] धन्य विभु! ॥
परिचारक[59] भिक्षुक[58] पशुपति[57] हे। भूताध्यक्ष[56] महाबल यति हे ॥
खट्वांगी वरधारक[55] दोता। बहुबेषक[54] हे! बटुक[53] विधाता ॥
शान्तजनः प्रिय[52] डिम्भ शान्त[51] जय। तीन-नेत्र-सुत[50] त्रिलोकपति[19] जय ॥
शिखि[48] त्रय ज्वलन्नेत्र[47] त्रय लोचन[46]। कलानिधि[45] कमनीय[44] सुशोभन ॥
कपालमाली[43] काल[42] महान। कपालभृत[41] व्योमकेश[40] सुजान ॥
नागपाश[39] हे नाग सुहारी[38]। प्रतिभावान[37] सुधनी[36] महारी ॥
अधन हारि[35] धनदायक[34] स्वामी। योगिनी-पति[33] भूतप[32] अति नामी ॥
भैरवनाथ[31] अभीरु[30] धूम्र चखु[29]। कंकाली[28] असिपाणि[27] सर्व खलु ॥
शूलपाणि[26] अति-पिंगल-लोचन[25]। बहुत-नेत्र[24] त्रय-नेत्र[23] सुकविजन[22] ॥
कलाकाष्ठा-तनु[21] अभिरामा। कामशमन[20] कंकाल[19] सुहामा ॥
सिद्धसुसेवित[18] सिद्धिद[17] सिद्धः[16]। पानप[15] रक्तप[14] स्मरान्त कृतुद्धः[13] ॥
खर्पराशी[12] मांसाशी[11] बिहारी। श्मशानवासी[10] विराट[9] भारी ॥
क्षत्रिय[8] क्षेत्रद[7] क्षेत्रपाल[6] अति। क्षेत्रद[5] भूतभावनः[4] संपति ॥
भूतात्मा[3] अरु भूतनाथ[2] जय। बारम्बार नमो हे! भैरव[1] ॥
पाठ विलोम बटुक भा पूरा। जयति जयति जय भैरव शूरा ॥
दया-दृष्टि हरदम प्रभु राखो। प्रसन्न अति आशिष भाखो ॥

॥ कष्टहरं श्रीभैरवाष्टक-स्तोत्रम् ॥

ॐ चण्ड प्रतिचण्ड करधृतदण्डं कृतरिपुखण्डं सौख्यकरं,
लोकं सुखयन्तं विलसितसन्तं प्रकटिदन्तं नृत्यकरम्।
डमरुध्वनिमन्तं तरलतरं तं मधुरहसन्तं लोकभरं,
भज भज भूतेशं प्रकट महेशं भैरववेषं कष्टहरम् ॥1॥

चर्चित-सिन्दूरं रणभुवि शूरं दुष्टविदूरं श्रीनिकरं,
किङ्कणिगणरावं त्रिभुवनपावं खर्परसावं पुण्यभरमं।
करुणामयवेषं सकलसुरेशं मुक्तसुकेशं पापहरं,
भज भज भूतेशं प्रकट महेशं भैरववेषं कष्टहरम् ॥2॥

कलिमलसंहारं मदनविहारं फणिपतिहारं शीघ्रकरं,
कलुषं शमयन्तं परिभृतसन्तं मत्तछगं तं शुद्धतरम्।
गतिनिन्दितहंसं नरनुतहंसं स्वच्छशुकं सनू-मुण्डकरं,
भज भज भूतेशं प्रकट महेशं भैरववेषं कष्टहरम् ॥3॥

कठिनस्तनकुम्भं सुकृतसुलम्भं कालीडिम्भं खड्गधरं,
वृतभूतपिशाचं स्फुटमृदुवाचं स्निग्धसुकाचं भक्तभरम्।
तनुभाजितशेषं विमलसुदेशं सर्वसुरेशं प्रीतिपरं,
भज भज भूतेशं प्रकट महेशं भैरववेषं कष्टहरम् ॥4॥

ललिताननचन्द्रं सुमुखवितन्द्रं बोधितमन्द्रं श्रेष्ठवरं,
सुखिताखिललोकं परिहृतशोकं शुद्धिविलोकं पुष्टिकरम्।
वरदाभयहारं तरलिततारं क्षुद्रविहारं तुष्टिकरं,
भज भज भूतेशं प्रकट महेशं भैरववेषं कष्टहरम् ॥5॥

सकलायुधभारं विजनविहारं विश्वविसारं भृष्टमलं,
शरणागतपालं मृगमदभालं संजितकालं स्वेष्टबलम्।
पदनूपुरशिञ्जं त्रिनयनकञ्जं गुणिजनरञ्जं कुष्ठहरं,
भज भज भूतेशं प्रकट महेशं भैरववेशं कष्टहरम् ॥6॥

मदयुत-संरावं प्रकटितभावं विश्वसुभावं ज्ञानपदं,
रक्तांशुकजोषं परकृततोषं नाशितदोषं सन्मतिदम्।
कुटिलभ्रुकुटीकं ज्वरधनवीकं विसरन्ध्रीकं प्रेमभरं,
भज भज भूतेशं प्रकट महेशं भैरववेषं कष्टहरम् ॥7॥

परिनिर्जितकामं विलसितवामं परमभिरामं योगेशं,
बहुमद्यपनाथं गीत-सुगाथं कृष्टसुनाथं वीरेशम्।
कलयन्तमशेषं भृतजनदेशं नृत्यसुरेशं दत्तवरं,
भज भज भूतेशं प्रकट महेशं भैरववेषं कष्टहरम् ॥8॥

एक अन्य अष्टोत्तर शतनाम स्तोत्र

जिस प्रकार 'रुद्रयामल-तन्त्र' में श्री बटुक भैरव का अष्टोत्तरशत-नाम-स्तोत्र दिया गया है, उसी प्रकार अन्य तन्त्र ग्रन्थों में भी न्यूनाधिक नामान्तर से ऐसे स्तोत्र प्राप्त होते है। ऐसे स्तोत्रों की विविधता के कारण आम्नाय-भेद, देश-काल-भेद, उपसना क्रम-भेद एवं फल-भेद मानने चाहिए। वैसे इष्ट देव के अनन्त नामों के सङ्ग्रहण में कोई तर-तमता अथवा उच्चावचता नहीं रहती। इन स्तोत्रों के वक्ता और श्रोता भी भगवान् शिव और भगवती पार्वती ही हैं अतः इनमें अन्तर न रखते हुए गुरुपदेश एवं अपनी भक्ति-मूलक अभिरुचि को ध्यान में रखकर पाठ करें।

इस स्तोत्र के प्रारम्भ में 6 पद्य इसकी प्रासङ्गिकता और फल-वर्णन के लिए प्रदत्त हैं। जिनमें भगवान् शिव (ईश्वर भगवती) देवी को सम्बोधित करते हुए कहते हैं कि—महात्मा भैरव का 108 नामवाला स्तोत्र मैं कहता हूँ। यह आपदुद्धारक, सर्वशत्रुनिवारक, अपमृत्युहारी, दिव्य, आधि-व्याधि-विनाशक, सर्ववशकारी, विवाद में विजयप्रद, महामारी-चोर-वायु-अग्नि-जल आदि से उत्पन्न भय के समय, एक बार पाठ करने से ही सभी उपद्रवों का नाश करता है। यह धन-सम्पत्ति और पुत्र-पौत्रादि का वर्द्धक है। तथा नर-नारी एवं राजाओं को वश में करने में उपयोगी है। अम्बिके! सब शास्त्रों में जो सार रूप है और मैंने इसे वेद से उद्धृत किया हैं अब मैं, तुम्हारे लिए इसका कथन करता हूँ—

अथ काल-सङ्कर्षण-तन्त्रोक्तं
श्री बटुक-भैरवाष्टोत्तरशतनाम-स्तोत्रम्

विनियोगः—अस्य श्री बटुकभैरवाष्टस्तोत्र मन्त्रस्य कालाग्निरुद्र ऋषिरनुष्टुप्छन्दः

आपदुद्धारक श्री बटुककेश्वरो देवः भैरवी वल्लभः शक्तिः ह्रीं बीजं दण्डपाणिः कीलकं मम समस्तशत्रुदमने समस्तापन्निवारणे सर्वाभीष्टप्रदाने च विनियोगः। ऋष्यादिन्यासः–कालग्निरुद्रऋषये नमः (शिरसि)। अनुष्टप् छन्छसे नमः (मुखे)। आपदुद्धारक श्री बटुकेश्वर देवाय नमः (हृदये)। भैरवीवल्लभशक्तये नमः (पादयोः)। ह्रीं बीजाय नमः (गुह्ये)। दण्डपाणि-कीलकाय नमः (नाभौ)। मम समस्त शत्रुदमन-समस्तापन्निवारण-सर्वाभीष्टप्रदान विनियोगाय नमः (सर्वाङ्गे)।

कर षडङ्गन्यासौ–ॐ हाँ बाँ अंगुष्ठाभ्यां नमः। ॐ ह्रीं बीं तर्जनीभ्यां नमः। ॐ हूँ बूँ मध्यमाभ्यां नमः। ॐ हैं बैं अनामिकाभ्यां नमः। ॐ हौं बौं कनिष्ठकाभ्यां नमः। ॐ हः बः करतलपृष्ठाभ्यां नमः।

(एवं हृदयादि)

ध्यानम्

नीलजीभूत-सङ्काशो, जटिलो रक्तलोचनः।
दँष्ट्रा-कराल-वन्दनः, सर्पयज्ञोपवीतवान् ॥1॥

दँष्ट्रायुधालङ्कृतश्च, कपालस्त्रग्विभूषितः।
हस्तन्यस्त-किरीटीको, भस्मभूषित-विग्रहः ॥2॥

नागराज-कटीसूत्रो, बालमूर्तिर्दिगम्बरः।
मञ्जु-शिञ्जान-मञ्जीर-पादकम्पित-भूतलः ॥3॥

भूत-प्रेत-पिशाचैश्च, सर्वतः परिवारितः।
योगिनीचक्र-मध्यस्थो, मातृमण्डल-वेष्टितः ॥4॥

अट्टहास-स्फुरद्वक्त्रो, भृकुटी-भीषणाननः।
भक्त-संरक्षणाथार्य, दिक्षु भ्रमण-तत्परः ॥5॥

एवम्भूतं तु बटुकं, ध्यायामि बटुकेश्वरम्।
आपदुद्धारकं देवं, सर्व-कामार्थ-दायकम् ॥6॥
एवं ध्यात्वा मानसैः सम्पूज्य च 108 वारं मूलमन्त्रं जपेत्।

मूलमन्त्रो यथा–''ॐ ह्रीं बं बटुकाय क्ष्रौं क्ष्रौं आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं बटुकाय स्वाहा।''

मन्त्रजप-प्रार्थना

तारो माया तदनु बटुकाय द्वयं क्ष्रौं तदाय—
च्छब्दोद्धाराय शिरसि कुरु द्वन्द्वमुच्चैः प्रयुज्य।
ह्रीं बीजं यद्बटुक-पुटिलं भौवनं चाग्निजाया।
एषा विद्या बटुक-भव ते वाञ्छितं मे ददातु ॥

अथ स्तोत्रम्

ॐ ह्रीं बटुको वरदः शूरो, भैरव काल-भैरवः।
भैरवी-वल्लभो भव्यो, दण्डपाणिर्दयानिधिः ॥1॥

वेतालवाहनो रौद्रो, रुद्र-भृकुटि-सम्भवः।
कपाललोचनः कान्तः कामिनीवशकृद् वशी ॥2॥

आपदुद्धारणो धीरो, हरिणाङ्क-शिरोमणिः।
दंष्ट्राकरालो दृष्टौष्ठो, धृष्टो दुष्टनिबर्हणः ॥3॥

सर्पहारः सर्पशिराः, सर्प-कुण्डल-मण्डितः।
कपाली करुणापूर्णः, कपालिक-शिरोमणिः ॥4॥

श्मशानवासी मांसाशी, मधुमत्तोऽट्टहासवान्।
वाग्मी वामव्रतो वाङ्मी, वामदेवप्रियङ्करः ॥5॥

वनेचरो गिरिचरो, वसुदो वायुवेगवान्।
योगी योगव्रतधरो, योगिनीवल्लभो युवा ॥6॥

वीरभद्रो विश्वनाथो, विजेता वीरवन्दितः।
भूताध्यक्षो भूतिधरो, भूतभीति-निवारणः ॥7॥

कलङ्कहीनः कङ्काली क्रूरः कुक्कुरवाहनः।
गाढ़ो गहनगम्भीरो, गणनाथे-सहोदरः ॥8॥

देवीपुत्रो दिव्यमूर्ति र्दीप्तिमान् दीप्तलोचनः।
महासेन-प्रियकरो, मान्यो माधव-मातुलः ॥9॥

भद्रकालीपतिर्भद्रो, भद्रदो भद्रवाहनः।
पशूपहार-रसिकः, पाशी पशुपतिः पतिः ॥10॥

चण्डः प्रचण्ड चण्डेशश्चण्डी-हृदयनन्दनः।
दक्षो दक्षाध्वर-हरो, दिग्वासा दीर्घलोचनः ॥11॥

निरातङ्को निर्विकल्पः कल्पः कल्पान्तभैरवः।
मदताण्डवकृन् मत्तो, महादेवप्रियो महान् ॥12॥

खट्वाङ्गपाणिः खातीतः खरशूलः खरान्तकृत।
ब्रह्माण्डभेदनो ब्रह्मज्ञानी ब्रह्मण-पालकः ॥13॥

दिक्चरो भूचरो भूष्णुः, खेचरः खेलनप्रियः।
सर्वरोग-प्रहर्त्ता च, सर्वरोग निषूदनः ॥ 14 ॥

सर्वकामप्रदः शर्वः सर्वपापनिकृन्तनः।
पातु मां सर्वतः श्रीमान्, बटुको भैरवः सदा ॥॥15॥

इस स्तोत्र के अन्त में कहा गया है कि, ''यह सर्व-समृद्धिदायक और आपत्ति-निवारक स्तोत्र मैंने कहा है। जो इसे नित्य सुने, लिखे, घर में रखे, गले में, अथवा बाहु में धारण करे उसको सब समृद्धियाँ प्राप्त होती हैं। किसी प्रकार का भय नहीं होता। तीन माह तक पाठ करने से दारिद्रय नाश होता है तथा पाठक को भूमिगत धर्म दिखता है। दो मास तक पाठ करने से अनेक सिद्धियाँ मिलती हैं। एक वर्ष तक पाठ करने से सहर्ष सिद्धि होती है। यह अत्यन्त गोपनीय स्तोत्र मैंने तुमको बताया है। यह सर्वविध पापों का नाश करने वाला स्तोत्र है।

श्री बटुक-भैरव-रहस्यम्

श्रीदेव्युवाच

भगवन् देवदेवश!, रहस्यं बटुकाय मे।
ब्रूहि येन वशीकुर्यात्, साधको भैरवं शिवम् ॥1॥

श्रीबटुक उवाच

शृणु देवि! परं गोप्यं, कथयामि सुशोभने।
रहस्यं सिद्धिदं साक्षाद् बटुकस्य महात्मनः ॥2॥

सर्वे बटुकदेवस्य, साधने ये निरुपिताः।
उपाया निष्फला एव, विधानं वीरसाधनम् ॥3॥
यो वीरसाधनं हित्वा, उपायं चान्यमाश्रयेत्।
न स सिद्धिमवाप्नोति, नरो वर्षशतैरपि ॥4॥
दक्षिणे भूचरः पातु, वामे पातु सदाशिवः।
केशान् पातु विशालाक्षो, मूर्धानं मे मरुत्प्रियः ॥5॥
मस्तकं पातु भृग्वीशो, नेत्रं पातु महामनाः।
कपोलौ पातु वीरेशो, गण्डौ गण्डारिमर्दनः ॥6॥
उत्तरोष्ठं विरुपाक्षो, ह्यधरे योगिनीप्रियः।
दन्ते वक्षसि विध्वंसी, चिबुके पातु कालधृक् ॥7॥
कण्ठे रक्षतु मे देवो, नीलकण्ठो जगद्गुरुः।
दक्षस्कन्धे गिरीन्द्रेशो, वामस्कन्धे च सुन्दरः ॥8॥
भुजे च दक्षिणे सर्वमन्त्रनाथः सदाऽवतु।
वामे भुजे सर्वभीमो, हृदयं पातु पाण्डुरः ॥9॥
दक्षस्तने पशुपतिर्वामे पातु महेश्वरः।
उदरे सर्वकल्याणकारकोऽवतु मां सदा ॥10॥
नाभौ कामप्रतिध्वंसी जङ्घे पातु महामनाः।
जानुनी पातु यामित्रो, गुल्फो गौरीपतिः सदा ॥11॥
पादपृष्ठौ ज्ञाननिधिस्तथा पादाङ्गुलीर्हरः।
पादाधः पातु सततं व्योमकेशो जगत्प्रियः ॥12॥
इति रक्षां समाधाय, मन्त्ररक्षां ततश्चरेत्।

अथ मन्त्ररक्षा

ऊँ ह्रां ह्रीं ह्रूं हः पूर्वे भैरवाय नमः।
ऊँ हिं हुं हौं ओग्नेय रुरु भैरवाय नमः।
ऊँ ह्रीं श्रीं दक्षिणे चण्ड भैरवाय नमः।
ऊँ ल्हां ग्ल्हूं गल्हं नग नग नैर्ऋत्ये क्रोध भैरवाय नमः।
ऊँ प्रं श्रूं प्रूं सः सः पश्चिमे उन्मत्त भैरवाय नमः।
ऊँ ब्राँ ब्राँ ब्राँ वायव्ये कपाल भैरवाय नमः।
ऊँ भ्रां भ्रां भ्रां उत्तरे भीषण भैरवाय नमः।
ऊँ प्रूं प्रूं स्रूं फट् ईशाने संहार भैरवाय नमः।

॥ इति श्रीश्वरदेवीसंवादे रुद्रयामले तन्त्रे बटुकभैरवरहस्यं सम्पूर्णम् ॥

श्री बटुक-रहस्य का हिन्दी सारार्थ

श्रीबटुक भैरव के लिए नमस्कार है। श्रीभैरव रहस्य प्रारम्भ होता है। श्रीदेवी बोली—हे देव देवेश भगवान्! मुझे बटुक का रहस्य बताइए जिससे साधक भैरव शिव को वश में कर सके।

श्री वटुक बोले—हे सुन्दरी देवी, सुनो! मैं परम गोपनीय तथा साक्षात् सिद्धि देने वाले बटुक का रहस्य कहता हूँ। बटुक के साधन में जो सभी उपाय बतलाए गए हैं, वे बिना वीरसाधक विधान के निष्फल ही है।

जो मनुष्य वीर साधन को छोड़कर अन्य उपाय का आश्रय लेता है, वह सैकड़ों वर्षों में भी सिद्धि प्राप्त नहीं कर सकता। दक्षिण में भूचर रक्षा करे, वाम भाग में सदाशिव रक्षा करे। विशालाक्ष केशों की और मरुत्प्रिय भैरव मेरे सिर की रक्षा करे। भृग्वीश मस्तक की रक्षा करे, महामना नेत्र की रक्षा करे। दोनों कपोलों की वीरेश और दोनों गण्डस्थलों की गण्डारिमर्दन रक्षा करे। ऊपर के ओष्ठ की विरूपाक्ष, अधरोष्ठ की योगिनीप्रिय, दन्त और वक्षःस्थल की विध्वंसी तथा कालरूपधृक् ठोड़ी की रक्षा करे। जगद्गुरु नीलकण्ठ देव मेरे कण्ठ की रक्षा करे। दाहिने कन्धे की गिरीन्द्रेश और बाँए कन्धे की सुन्दर रक्षा करे। दाहिनी भुजा में सर्वमन्त्रों के स्वामी—सर्वमन्त्रनाथ और बाईं भुजा में सर्वभीम सदा रक्षा करे। पाण्डुर नामक भैरव हृदय की रक्षा करे। दाहिने स्तन की पशुपति और बाँए स्तन की महेश्वर रक्षा करे। तथा उदर पर सर्वकल्याणकारक मेरी सदा रक्षा करे। नाभि पर कामदेव का विनाश करने वाला तथा दोनों जङ्घाओं पर महात्मा रक्षा करे। दोनों जानुओं की यामित्र और दोनों गुल्फों की गौरीपति सदा रक्षा करे। पैरों के पिछले भागों की ज्ञाननिधि, पैरों की अँगुलियों की हर तथा पैरों के नीचे जगत्-प्रिय व्योमकेश सदा रक्षा करे ॥13॥

इस प्रकार रक्षा करके बाद में मन्त्र रक्षा करे।

मन्त्ररक्षा—पीछे लिख हुए मन्त्रों को बोलकर जिस-जिस दिशा का संकेत दिया है, उस ओर हाथ जोड़कर प्रणाम करें।

श्रीबटुक-हृदयम्[1]

कैलाशशिखरासीनं, देवदेवं जगद्गुरुम्।
देवी पप्रच्छ सर्वेशं, शङ्करं वरदं शिवम् ॥1॥

देव्युवाच– देव-देव परेशान भक्ताभीष्टप्रदायक!।
प्रब्रूहि मे महाभाग गोप्यं यद्यपि न प्रभो ॥2॥
बटुकस्यैव हृदयं, साधकानां हिताय च।

शिव उवाच–शृणु देवि! प्रवक्ष्यामि हृदयं बटुकस्य च ॥3॥

गुह्यद्गुह्यतरं गुह्यं तच्छृणुष्व तु मध्यमे।
हृदयास्यास्य देवेशि! बृहदारण्यको ऋषिः ॥4॥
छन्दोऽनुष्टुप् समाख्यातो देवता बटुकः स्मृतः।
प्रयोगभीष्टसिद्ध्यर्थं विनियोगः प्रकीर्तितः ॥5॥
ऊँ प्रणवेशः शिरः पातु ललाटे प्रथमाधिपः।
कपोलौ कामवपुषौ भ्रू भागे भैरवेश्वरः ॥6॥
नेत्रयोर्वह्निनयनो नासिकायामघापहः।
ऊर्ध्वोष्ठे दीर्घनयनो ह्यधरोष्ठे भयाशनः ॥7॥
चिबुके भालनयनो गण्डयोश्चन्द्रशेखरः।
मुखान्तरे महाकालो भीमाक्षो मुखमण्डले ॥8॥
ग्रीवायां वीरभद्रोऽव्याद् घण्टिकायां महोदरः।
नीलकण्ठो गण्डदेशे जिह्वायां फणिभूषणः ॥9॥
दशने वज्रदशनो तालुके ह्यमृतेश्वरः।
दोर्दण्डे वज्रदण्डो मे स्कन्धयोः स्कन्धवल्लभः ॥10॥
कपूरे कञ्जनयनो फणौ फेत्कारिणीपतिः।
अङ्गुलीषु महाभीमो नखेषु अघहाऽवतु ॥11॥
कक्षे व्याघ्रासनः पातु कटयां मातङ्गचर्मणी।
कुक्षौ कामेश्वरः पातु बस्तिदेशे स्मरान्तकः ॥12॥

---

1. ''जपारम्भे च हृदयं जपान्ते कवचं पठेत्।'' इस वचन के अनुसार जप से पूर्व 'हृदय' का पाठ करना और जप के अन्त में 'कवच' का पाठ करना चाहिए।

शूलपाणिर्लिङ्गदेशे गुह्ये गुह्येश्वरोऽवतु।
जङ्घायां वज्रदमनो जघने जृम्भकेश्वरः ॥13॥
पादौ ज्ञानप्रदः पातु धनदश्चाङ्गुलीषु च।
दिग्वासी रोमकूपेषु सन्धिदेशे सदाशिवः ॥14॥
पूर्वाशां कामपीठस्थ उड्डीशस्थोऽग्निकोणके।
याम्यां जालंधरस्थो मे नैऋत्यां कोटिपीठगः ॥15॥
वारुण्यां वज्रपीठस्थो वायव्यां कुलपीठगः।
उदीच्यां बाणपीठस्थ ऐशान्यामिन्दुपीठगः ॥16॥
ऊर्ध्वं बीजेन्द्रपीठस्थः खेटस्थो भूतलोऽवतु।
रुरुः शयानेऽवतु मां चण्डो वादे सदावतु ॥17॥
गमने तीव्रनयन आसीने भूतवल्लभः।
युद्धकाले महाभीमो भयकाले भयान्तकः ॥18॥
रक्ष रक्ष परेशान भीमदंष्ट्र भयापह।
महाकाल महाकाल! रक्ष मां कालसङ्कटात् ॥19॥
इतीदं हृदयं दिव्यं सर्वपापप्रणाशनम्।
सर्वसम्पत्प्रदं भद्रे सर्वसिद्धिफलप्रदम् ॥22॥

श्रीबटुक-हृदय का हिन्दी सारार्थ

कैलाश पर्वत के शिखर पर बैठे हुए देवदेव जगद्गुरु वरदायक एवं कल्याणकारक सर्वज्ञ भगवान् शंकर से देवी पार्वती ने पूछा—हे देवाधिदेव, परमेश्वर, भक्तों की इच्छित कामना पूर्ण करने वाले पूज्य प्रभु, यद्यपि गोपनीय है फिर भी साधकों के हित के लिए बटुक का 'हृदय-स्तोत्र' मुझे कहिए।
शिवजी बोले—हे मध्यमे देवि! मैं तुम्हें 'बटुक-हृदय' कहता हूँ जो गुप्त से भी गुप्त है। हे देव-स्वामिनी, इस हृदय के बृहदारण्यक ऋषि हैं, अनुष्टुप् छन्द है, श्रीबटुक-भैरव देवता हैं तथा अभीष्ट प्रयोग की सिद्धि के लिए विनियोग कहा गया है। **अर्थात्–अस्य श्रीबटुकहृदयस्य बृहदारण्यक ऋषिः अनुष्टुप् छन्दः श्रीबटुकभैरवो देवता ममाभीष्टसिध्यर्थ पाठे विनियोगः।** 'इतना बोलकर विनियोग करे।' इसके पश्चात् नीचे लिखे अनुसार तत्त्वमुद्रा से न्यास करते हुए सूचित स्थानों का स्पर्श करे।
देहन्यास—प्रणवेश सिर की रक्षा करे। प्रथमाधिप ललाट की, कामवपुष् कपोलों की, भैरवेश्वर भ्रूभाग पर, वह्निनेत्र दोनों नेत्रों पर, अघापह नासिका पर, दीर्घनयन ऊर्ध्वोष्ठ पर, भयाशन अधरोष्ठ पर, भालनयन ठोड़ी पर, चन्द्रशेखर

दोनों गणस्थलों पर, महाकाल मुख के अन्दर, भीमाक्ष मुखमण्डल पर, वीरभद्र गले पर तथा महोदर कण्ठमणि पर रक्षा करे। नीलकण्ठ कण्ठ पर, फणिभूषण जीभ पर, वज्रदन्त दांतों पर, अमृतेश्वर तालु पर, वज्रदण्ड दोनों भुज-दण्डों पर, स्कन्दवल्लभ दोनों कन्धों पर, कंजनयन दोनों कोहनियों पर, फेत्कारिणीपति फणि-मणिबन्धों पर, महाभीरु अंगुलियों पर और मखहा नखों की रक्षा करे।

व्याघ्रासन वक्ष में, मतंगचर्मणी कटि में, कामेश्वर कुक्षियों में तथा स्मरान्तक बस्ति-प्रदेश में रक्षा करे। शूलपाणि लिंगदेश में और गुह्येश्वर गुह्य भाग में रक्षा करे। वज्रदमन जंघा पर, जृम्भकेश्वर जघन पर, ज्ञानप्रद दोनों पैरों पर, धनद सभी पैर की अंगुलियों पर रक्षा करे। दिग्वासी रोमकूपों पर और सदाशिव सन्धि स्थलों पर रक्षा करे ॥13-14॥

दिग्रक्षा–कामपीठस्थ पूर्व में, उड्डीशस्थ अग्निकोण में, जालन्धरस्थ दक्षिण में, कोटिपीठस्थ नैर्ऋत्य में, वज्रपीठस्थ पश्चिम में, कुलपीठस्थ वायव्य में, गणपीठस्थ उत्तर में, इन्दुपीठस्थ ऐशान्य में, बीजेन्द्रपीठस्थ ऊपर तथा खेटस्थ भूतल पर मेरी रक्षा करे। रुरुभैरव सोते हुए मेरी रक्षा करे। चण्डभैरव वाद-विवाद में सदा रक्षा करे। तीव्रनयन जाते समय, भूतवल्लभ बैठे रहने पर, महाभीम युद्धकाल में तथा भयान्तक भयकाल में रक्षा करे। हे परमेश्वर, भीमदंष्ट्र, भयहारी रक्षा करो। रक्षा करो। हे महाकाल! हे काल के भी काल! यमराज के संकट से मेरी रक्षा करो।
यह 'बटुक-हृदय' स्तोत्र दिव्य है, सब पापों का नाश करने वाला है। हे भद्रेः यह सब सम्पत्तियों को देने वाला तथा सर्वसिद्धिरूप फल को देने वाला है।

रूद्रयामलोक्तः श्रीबटुक-भैरव-ब्रह्म कवचराजः

भगवती पार्वती द्वारा हठपूर्वक 'भैरव-कवच' के पूछने पर भगवान् शंकर ने कृपा करके जो 'बटुकेश्वर ब्रह्मकवच' बतलाया है, वह इस प्रकार है–
अथ विनियोग–(अस्य श्रीवटुकभैरवकवचराजस्य भैरवऋषिरनुष्टुपूछन्दः श्री वटुकभैरवो देवता मम वटुकभैरव प्रसाद सिद्धयर्थे जपे विनियोगः।)
(इतना कहकर विनियोगार्थ जल छोड़ें तथा नीचे लिखे श्लोकों को बोलते

हुए उन-उन सूचित स्थानों पर तत्त्वमुद्रा से स्पर्श करते हुए न्यास करें अथवा केवल भावना-पूर्वक पाठ करें।)

ॐ पातु शिरसि नित्यं पातु ह्रीं कण्ठदेशके।
वटुकाय पातु नाभौ चाप्दुद्धारणाय च ॥1॥

कुरुद्वयं लिङ्गमूले त्वाधारे बटुकाय च।
सर्वदा पातु ह्रीं बीजं बाह्वोर्युगलमेव च ॥2॥

षडङ्गसहितो देवो नित्यं रक्षतु भैरवः।
ॐ ह्रीं वटुकाय सततं सर्वाङ्ग मम सर्वदा ॥3॥

ॐ ह्रीं पादौ महाकालः पातु वीरासनेहृदि।
ॐ ह्रीं कालः शिरः पातु कण्ठदेशे तु भैरवः ॥4॥

गणराट् पातु जिह्वायामष्टभिः शक्तिभिः सह।
दण्डपाणिर्गुह्यमूले भैरवी-सहितस्तथा ॥5॥

विश्वनाथः सदा पातु सर्वाङ्गं मम सर्वदा।
अन्नपूर्णा सदा पातु चांसौ रक्षतु चण्डिका ॥6॥

असिताङ्ग शिरः पातु ललाटं रुरु भैरवः।
चण्डभैरवः पातु वक्त्रं कण्ठं श्रीक्रोध भैरवः ॥7॥

उन्मत्तभैरवः पातु हृदयं मम सर्वदा।
नाभिदेशे कपाली च लिङ्गे भीषण भैरवः ॥8॥

संहारभैरवः पातु मूलाधारं च सर्वदा।
बाहुयुग्मं सदा पातु भैरवो मम केवलम् ॥9॥

हंसबीजं पातु हृदि सोऽहं रक्षतु पादयोः।
प्राणापानौ समानं च उदानं व्यानमेव च ॥10॥

रक्षन्तु द्वारमूले तु दशदिक्षु समन्ततः।
प्रणवः पातु सर्वाङ्गगं लज्जाबीजं महाभये ॥11॥

इति श्रीब्रह्मकवचं भैरवस्य प्रकीर्तितम्।

भैरव-तन्त्रोक्तं श्रीबटुक-भैरव-कवचम्

अस्य श्री बटुक-भैरव-कवचस्य आनन्दभैरव ऋषिस्त्रिष्टुप् छन्दः श्री बटुकभैरवोदेवता बं बीजं ह्रीं शक्तिः ॐ बटुकायेति कीलकं ममाभीष्टसिद्ध्यर्थे जपे विनियोगः।

ॐ सहस्रारे महाचक्रे कर्पूरधवले गुरुः।
पातु मां बटुको देवो भैरवः सर्वकर्मसु ॥1॥

पूर्वस्यामसिताङ्गो मां दिशि रक्षतु सर्वदा।
आग्नेय्यां च रुरुः पातु दक्षिणे चण्डभैरवः ॥2॥

नैऋत्यां क्रोधनः पातु उन्मत्तः पातु पश्चिमे।
वायव्यां मां कपाली च नित्यं पायात् सुरेश्वरः ॥3॥

भीषणो भैरवः पातु उत्तरस्यां तु सर्वदा।
संहारभैरवः पायादीशान्यां च महेश्वरः ॥4॥

ऊर्ध्वं पातु विधाता च पाताले नन्दको विभु।
सद्योजातस्तु मां पायात् सर्वतो देवसेवितः ॥5॥

वामदेवो वनान्ते च वनेऽघोरस्तथाऽवतु।
जले तत्पुरुषः पातु स्थले ईशान एव च ॥6॥

डाकिनीपुत्रकः पातु पुत्रान् मे सर्वतः प्रभुः।
हाकिनीपुत्रकः पातु दारांस्तु लाकिनी सुतः ॥7॥

पातु शाकिनिकापुत्रः सैन्यं वै कालभैरवः।
मालिनीपुत्रकः पातु पशूनश्वान् गजांस्तथा ॥8॥

महाकालोऽवतु क्षेत्रं श्रियं मे सर्वतो गिरा।
वाद्यं वाद्यप्रियः पातु भैरवो नित्यसम्पदा ॥9॥[1]

नमो भैरवदेवाय सर्वभूताय वै नमः।
नमस्त्रै लोक्यनाथाय नाथनाथाय वै नमः ॥10॥[2]

---

1. तन्त्रों में अनेक कवच-स्तोत्रों के पाठ प्राप्त होते हैं, उनमें से यहां तीन कवच-पाठ दिये गये हैं। इनमें से किसी एक का पाठ करें।
2. इनके अतिरिक्त एक 'बटुक-भैरव-पञ्जर-कवच' भी प्राप्त होता है, उसे 'वृहज्ज्योतिपाणवि' में देखें।

ऐश्वर्यदायकं श्रीबटुक-भैरव-कवचम्

अस्य श्रीबटुक-भैरव-कवचस्य शिवब्रह्मऋषिरनुष्टुप् छन्दः श्रीबटुकभैरवो देवता ममैश्वर्यस्याभिष्टद्धयर्थं श्रीबटुकभैरवः प्रसादसिद्धये जपे विनियोगः।

ध्यानम्

दिग्वासरां कमलपत्रविशालनेत्रं, भस्माङ्गरागमभयं प्रभुमादिदेवम्।
ध्यायामि तं बटुकनाथमहर्निशं मे, सर्वार्थसिद्धिमतुलां कृपया दिशन्तम् ॥

कवच-पाठ– शिरो मे भैरवः पातु, भालं पुर-निषूदनः।
दृशौ पातु त्रिनेत्री मे, श्रवणं नीलकण्ठकः ॥1॥

दिग्वासा मे पातु कण्ठं, नासिकाभगकन्यभाक्।
ओष्ठौ त्रिपुरधाती मे, जिह्वां पातु कपालधृक् ॥2॥

दन्तान् पातु क्रतुध्वंसी, चिबुकं भूतवासकः।
कपाली पातु मे ग्रीवां, स्कन्धौ पातु गजान्तकः ॥3॥

भुजौ मे पातु कौमारो, हृदयं क्षेत्र-पालकः।
अभीरुर्मे स्तनौ पातु, वक्षः पातु महेश्वरः ॥4॥

कुक्षौ मे पातु संहर्त्ता, नाभिं मे षण्मुखप्रियः।
भूतनाथः कटिं पातु, गुह्यं पातु जटाधरः ॥5॥

ऊरू पातु वृषारूढो, जानुनी भूतभावनः।
शमशानवासी मे पातु, पातु सर्वाङ्गमीश्वरः ॥6॥

श्रीबटुकभैरव-सहस्रनामस्तोत्रम्

भैरवतन्त्र में वर्णित श्रीबटुकभैरवसहस्रनाम स्तोत्र यहां दिया जा रहा है। जो भक्त जन इस दुर्लभ सहस्रनाम स्तोत्र का पाठ करते हैं, उन पर भगवान् बटुकभैरव प्रसन्न होकर उन्हें इच्छित फल प्रदान करते हैं।

देवेशि भक्तिसुलभे देवनायकवन्दिते।
भक्तानां कार्यसिद्ध्यर्थं निदानं ब्रूहितवत्तः ॥
विनैव न्यासजालेन पूजनेन विना भवेत्।
विना कायादिक्लेशेन वित्तव्ययं विनेश्ववरि ॥

भावार्थ–ईश्वर (शिवजी) ने कहा–हे देवपूजिते देवि! न्यास एवं पूजनादि की क्रियाओं में बिना, शरीर को कष्ट दिये बिना तथा धन खर्च किये बिना ही भक्तों की मनोकामना जिससे सिद्ध हो जाती है, उस उपाय को कहो।

देव्युवाच–ॐ अस्य श्रीबटुकभैरवसहस्रनामस्तोत्रमन्त्रस्य ब्रह्मानन्दभैरव ऋषिः। त्रिष्टुप् छन्दः। बटुकभैरवो देवता। वं बीजम्। ह्रीं शक्तिः। सर्वाभीष्टसिद्धये जपे विनियोगः।

अथ न्यसः ॐ ह्रां बां अङ्गुष्ठाभ्यां नमः। ॐ ह्रीं बीं तर्जनीभ्यां नमः। ॐ हुं बूं मध्यमाभ्यां नमः। ॐ हैं बैं अनामिकाभ्यां नमः। ॐ ह्रौं बौं कनिष्ठिकाभ्यां नमः। ॐ हः बः करतलकरपृष्ठभ्यां नमः। (एवं हृदयादि।)

अथ ध्यानम्

उद्यद्भास्करसन्निभं त्रिनयनं रक्ताङ्गरागस्रजं,
स्मेरास्यं वरदं कपालमभयं शूलं दधान करैः।
नीलग्रीवमुदार-कौस्तुभधरं शीतांशुचण्डोज्ज्वलं,
बन्धूकारुणवाससं भयहरं देवं सदा भावये ॥

अथ सहस्रनामानि

ॐ ह्रीं बटुकः कामदो नाथोऽनाथप्रियप्रभाकरः
भैरवो भीतिहा दर्पः कन्दर्पो मीनकेतनः ॥1॥

रुद्रो वटुर्विभूतीशो भूतनाथः प्रजापतिः।
दयालुः क्रूर ईशानो जनेशी लोकवल्लभः ॥2॥

देवो दैत्येश्वरो वीरो वीरवन्द्यो दिवाकरः।
बलिप्रियः सुरश्रेष्ठः कनिष्ठो नैष्ठिकः शिशुः ॥3॥

महाबलो महातेजा वित्तजो द्युतिवर्द्धनः।
तेजस्वी वीर्यवान् वृद्धो विवृद्धो भूतनायकः ॥4॥

बालकः पालकः कामो विकामः कामवर्धनः।
कालिकारमणः कालीनायकः कालिकाप्रियः ॥5॥

कालीशः कालिकाकान्तः कालिकानन्दवर्धनः।
कालिकाहृदयज्ञानी कालिकातनयो नयः ॥6॥

खगेशः खेचरः खेटो विशिष्टः खेटकप्रियः।
कुमारः क्रोधनः कालीप्रियः पर्वतरक्षकः ॥7॥

गणेज्यो गणपो गूढो गूढप्रायो[1] गणेश्वरः।
गणनाथो गणश्रेष्ठो गणमुख्यो गणप्रियः ॥8॥

घोरनादो घनश्यामो घनस्वामी घनान्तकः।
चम्पकाभश्चिरञ्जीवी [2]चारुवेषश्चराचरः ॥9॥

चिन्त्योऽचिन्त्यगुणो धीमान् [3]सुचित्तस्थश्चितीश्वरः।
छत्री छत्रपतिश्छेता छिन्नमस्ता-मनःप्रियः ॥10॥

छिन्नाभश्छिन्नसन्तापश्छर्दीशश्छर्दनान्तकः।
जेता जिष्णुर्जडिशानो जनानन्दो[4] जनेश्वरः ॥11॥

जनको जनसन्तोषो जनजाडय-विनाशनः।
जालन्धरो जनाराध्यो जनाध्यक्षो जनप्रियः ॥12॥

जीवहा जीवदो जन्तुर्जीवनाथो जनेश्वरः।
जयदो जित्वरो जिष्णुर्जयश्रीर्जयवर्धनः ॥13॥

जयभूमिर्जयाकारो जयहेतुर्जयेश्वरः।
झङ्कारकृदनन्तात्मा झङ्कार-हेतुरात्मभूः ॥14॥

पाठांतर—1. गूढाशयो, 2. चण्डवेष, 3. सच्चित्तस्थ., 4. जनार्द्दनो।

झञ्झाझरि ध्वनिर्भर्ता विभर्ता भृत्यकेश्वरः ।
टीत्कारकृदमेयात्मा टङ्केशष्टङ्कनायकः ॥15॥

ठकारभूष्ठरन्ध्रीशो गिरिष्ठष्ठक्कुरः पविः ।
ढुण्ढिर्ढक्काप्रियः पार्थो ढुण्ढिराजो निरन्तकः[1] ॥16॥

ताम्रस्तमीश्वरः स्तोता[2] तीर्थराजस्तडित्प्रभः ।
क्षणस्त्र्यक्षकस्तम्भस्तार्क्षकस्तम्भटेश्वरः ॥17॥

स्थलस्थः स्थावरः स्थाता स्थिरबुद्धि स्थिरेन्द्रियः ।
स्थिरज्ञानी स्थिरप्रीतिः स्थिरस्थितिः स्थिराशयः ॥18॥

दामो दामोदरो दम्भो दाडिमीकुसुमप्रियः ।
दारिद्र्यहा दमी दिव्यो दिव्यदेहो दिनप्रभः ॥19॥

दिनकरो दिवानाथो दिवसेशो दिवाकरः ।
दीर्घेशो दलनज्योतिर्दलेशो दलसुन्दरः ॥20॥

दलप्रियो दलाभासो दलपूज्यो दलप्रभुः ।
[3]दलकान्तिर्दलाकारो दलसेव्यो दलार्चितः ॥21॥

दीर्घबाहुर्द्दलश्रेष्ठो दललुब्धो दलाकृतिः ।
दानवश्यो दयासिन्धुर्दयालुर्दीनवल्लभः[4] ॥22॥

धनेशो धनदो धर्मो धनराजो धनप्रभुः ।
धनप्रदो धनाध्यक्षो धनमान्यो धनञ्जयः ॥23॥

धीवरो धातुको धाता ध्रुवो धूमच्छविर्धवः ।
धनिष्ठो धवलच्छत्री धनकाम्यो धनेश्वरः ॥24॥

धीरो धीरतरो धेनुर्धरेशो धरणीप्रभुः ।
धराधीशो धरानाथो धरणीनायको धरः ॥25॥

धराकान्तो धरापालो धरणीजनवल्लभः[5] ।
धराधरोऽ धरो धृष्ठो धृतराष्ट्रो धनीश्वरः ॥26॥

पाठांतर—1. निरर्थकः, 2. त्रेता, 3. दतुकीर्ति, 4. दीप्ति, 5. धरनी भूधरप्रियः

नारदो नीरदोऽन्नीतो नतिपूज्यो नतिप्रियः।
नतिलभ्यो नतीशानो नीतिलुब्धो नतीश्वरः ॥27॥

पाण्डवः पार्थसम्पूज्यः पार्थदः[1] प्रणतः पृथुः।
पृथिवीशः पृथासूनुः पृथिवीभृत् परेश्वरः ॥28॥

पुराणः पारदः पान्थः पाञ्चालीपातकः प्रभुः।
पूर्वः पुरपतिः श्रेयान् प्रीतिदः प्रीतिवर्द्धनः ॥29॥

पार्वतीशः परेशानः पार्वतीहृदयप्रियः।
पार्वतीरमणः पूतः पवित्रः पापनाशनः ॥30॥

पात्री पत्रालिसन्तुष्टः परितुष्टः पुमान् प्रियः।
पर्वेशः पर्वताधीशः पर्वतो नायकात्मजः ॥31॥

फणागुणः फणानाथः फणीशः फणरक्षकः।
फणीपतिः फणीशानः फणराजः फणाकृतिः ॥32॥

बलभद्रो बलो बालो बलधीर्बलबर्द्धनः।
बलप्राणो बलाधीशो बलिदान-प्रियंकरः ॥33॥

बलिराजो बलिप्राणो बलिनाथो बलप्रियः।
बलिवेशच बालेशो बालक-प्रियदर्शनः ॥34॥

भद्रो भद्रपदो भीमो भीमसेनो भयंकरः।
भव्यो भव्यप्रियो भूतपतिर्भूतविनाशनः ॥35॥

भूतेशो भूतिदो भर्गो भूतभव्यो भवेश्वरः।
भवानीशो भवेशानो भवानीनायकोऽर्भकः ॥36॥

मकरो माधवो मानी मीनकेतुर्महेश्वरः।
महेषुर्मदनो[2] मन्थो मिथुनेशोऽमराधिपः ॥37॥

मरीचिर्मञ्जुलो मोहो मोहहा मोहमर्दनः।
मोहको मोहनो मेधाप्रियो मोहविनाशकः ॥38॥

पाठांतर—1. पाथोद, 2. मेंदसो,

महीपतिर्महीशानो महीराजो मनोहरः ।
महीश्वरो महादेवो महीनाथो महीप्रियः ॥39॥

महीधरो महादेवो मनुराजो मनुप्रियः ।
मौनी मौनधरो मेघो[1] मन्दारो मतिवर्द्धनः ॥40॥

मतिदो मन्थरो मन्त्रो मन्त्रीशो मन्त्रनायकः[2] ।
मेधावी मानदो मानी मानहा मानमर्दनः ॥41॥

मीनगो मकराधीशे मधुरो मणिरञ्जितः ।
मणिरम्यो मणिभ्राता मणिमण्डन-मण्डितः ॥42॥

मन्त्रपो मन्त्रदो[3] मुग्धो मोक्षदो मोक्षवल्लभः ।
मल्लो मल्लप्रियो मञ्चो मेलको मेलनप्रभुः ॥43॥

मल्लिको मल्लिकागन्धी मल्लिका-कुसुमप्रियः ।
मालतीशो मेघनाथो मोघमूर्तिर्मघेश्वरः ॥44॥

मूलाभो मूलहा मूलो मूलदो मूलमत्सरः ।
माणिक्यरोचिः सम्मुग्धो मणिकूटो मणिप्रियः ॥45॥

मुकुन्दो मदनो मन्दो मन्दवन्द्यो मनुप्रभुः ।
मनःस्थो मेनकाधीशो मेनकाप्रियर्शनः ॥46॥

यमो यामो यमीदेवो[4] यादवो यदुनायकः ।
यावको याज्ञिको यज्ञो यज्ञेशो यज्ञवर्धनः ॥47॥

रम्भापती रमाधीयो रमेशो रामवल्लभः ।
रमापती रमानाथे रमाकान्तो रमेश्वरः ॥48॥

रेवती-रमणो रामो रमेशो रामनन्दनः ।
रम्यमूर्ती रतीशानो[5] राकाया नायको रविः ॥49॥

लक्ष्मीधरो ललज्जिह्वो लक्ष्मीबीजजपे रतः ।
लम्पटो लिङ्गराजेशो लम्बोदरो लकारभूः[6] ॥50॥

पाठांतर—1. मेषो., 2. मन्त्री मन्त्र विनायकः, 3. मण्डपो, मण्डपे, 4. यमश्च ·यामलो यन्ता ।
5. रंमेशानो 6. लकारगः

वामनो वल्लभो वन्द्यो[1] वनमाली वनेश्वरः।
वनस्थो वनगो विन्ध्यो[2] विन्ध्यराजो वनाह्वयः ॥51॥

वनेचरो वनाधीशो वनमाला-विभूषणः।
वेणुप्रियो वनाकारो वनाराध्यो वनप्रभुः ॥52॥

शम्भुः शङ्कर-सन्तुष्टः शम्बरारिः शरासनः।
शबरीप्रणतः शालः शिलीमुखध्वनिप्रियः ॥53॥

शकुलः शल्लकः[3] शीतः शीतरश्मिः सितांशुकः ।
शीलदः शीकरः शीलः शीलशीली[4] शनैश्चरः ॥54॥

सिद्धः सिद्धिकरः साध्यः सिद्धिभूः सिद्धिभावनः।
सिद्धान्तवल्लभः सिन्धुः सिन्धुतीर-निषेवितः ॥55॥

सिन्धुपतिः सरोधीशः सरसीरुह-लोचनः।
सरित्पतिः सरित्संस्थः सरः सिन्धुः सरोवरः ॥56॥

सखा सखीपतिः सूतः सचेताः सत्पतिः सितः।
सिन्धुराजः सदाभूतः सदाशिवः सताम्पतिः ॥57॥

सदीशः सदनः[5] सूरिः सेव्यमानः सतीपतिः।
सूर्यः सूर्यपतिः सेव्यः सेवाप्रियः सनातनः[6] ॥58॥

सतीशः सरसीनाथः सतीराजः सतीश्वरः।
सतीप्राणः सतीनाथः सतीसेव्यः सतीरतिः ॥59॥

सिद्धराजः सतीतुष्टः सचिवः सव्यवाहनः।
सतीनायक-सन्तुष्टः सव्यसाची सुमन्तकः ॥60॥

सच्चित्तः सर्वसन्तोषी सर्वाराधन सिद्धिदः।
सर्वाराध्यः सचिवाख्यः सचीपतिसुसेबितः ॥61॥

सगरः सागरः सार्थः समुद्रः समुद्रप्रियः।
समुद्रतीरसन्तुष्टः समुद्रप्रियदर्शनः ॥62॥

पाठांतर—1. वर्ण्यो 2. वन्धो 3. शकलः 4. सालसालि० 5. सदणुः 6. सेवाप्रियसदासनुः।

समुद्रेशः सरोनाथः सरसीज-विलोचनः ।
सरसीजलदाकारः सरसीजलदार्चितः ॥63॥

समुद्रकः समुद्रात्माः साध्यमानः सुरेश्वरः ।
सुरसेव्यः सुरेशानः सुरनाथः सुरार्चितः ॥64॥

सुराध्यक्षः सुराराध्यः सुरवन्द्यविशारदः ।
सुरमुख्यः सुरप्रायः सुरसिन्धुनिवासवान् ॥65॥

सुधाप्रियः सुधाधीशः सुधाराध्यः सुधापतिः ।
सुधानाथः सुधाभूतः सुधासागर-सेवितः ॥66॥

हाटको हीरको हन्ता हीरको रुचिरप्रभः ।
हव्यावाहो हरिद्राभो हरिद्रारसदर्शनः ॥67॥

हेतिर्हेतुर्हरित्राता हरिनाथो हरिप्रियः ।
हरिपूज्यो हरिप्राणो हरहृष्टो हरिद्रकः ॥68॥

हरीशो हन्तृको हीरो हरिनामपरायणः ।
हरिमुग्धो हरिरम्यो हरिदासो हरीश्वरः ॥69॥

हरो हरपतिर्हारो हरिणीचित्तहारकः ।
हरहीतो हरप्राणो हरविाहन-शोभनः ॥70॥

हासो हासप्रियो हूहूर्हुतभुग् हुतवाहनः ।[1]
हुताशनो हली हक्को हलाहल-हलायुधः ॥71॥

हलाकारो हलीशानो हलिपूज्यो हलिप्रियः ।
हरपुत्रो हरोत्साहो हरसूनुर्हरात्मजः ॥72॥

हरवन्द्यो हराधीशो हरातङ्को हराकृतिः ।
हरमान्यो हराङ्कस्थो हरवैरि-विनाशनः ॥73॥

हरशत्रुर्हरामर्षोऽहंकारो हरिणीप्रियः ।
हाटकेशो हहेशानो हाटकप्रियदर्शनः ॥74॥

पाठांन्तर—1. यह पंक्ति कहीं नहीं भी है।

हाटको हाटक-प्राणो हाट्भूषणभूषितः।
हेतिदो हंसको हंसो हंसगतिर्हराह्वयः ॥75॥

हंसीपतिर्हरोन्मत्तो हंसीशो हरवल्लभः।
हरपुष्पप्रभो हंसीप्रियो हंसविलासकः ॥76॥

हरबीजरतो हारी हरितो हरिताम्पतिः।
हरित्प्रभुर्हरित्पालो हरिदन्तरनायकः ॥77॥

हरिदीशो हरित्प्राणो हरप्रियः प्रियो हितः।
हेरम्बो हुंकृति-क्रुद्धो हेरम्बानन्दनो हठी ॥78॥

हेरम्बप्राण-संहर्ता हेरम्ब-हृदयप्रियः
क्षमापतिः क्षणः क्षान्तः क्षुरधारः क्षितीश्वरः ॥79॥

क्षितीशः क्षितितः क्षीणः क्षितिपालः क्षितिप्रभुः।
क्षितीशानः क्षितिप्राणः क्षितिनायकसत्प्रियः ॥80॥

क्षितिराजः क्षणादाधीशः क्षणपतिः क्षणेश्वरः।
क्षणप्रियः क्षमानाथः क्षणदानायक-प्रियः ॥81॥

क्षणिकः क्षणदाधीशः क्षणदाप्राणदः क्षमी।
क्षमः क्षोणिपतिः क्षोभः क्षोभकारी[1] क्षमाप्रियः ॥82॥

क्षमाशीलः क्षमारूपः क्षमामण्डनमण्डितः।
क्षमानाथः क्षमाधारः क्षमाकारीः क्षमाकारः[2] ॥83॥

क्षामः क्षीणरजाः क्षुद्रः क्षद्रपान[3]-विशारदः।
क्षुद्रेशानः[4] क्षणाकारः क्षीरपानकतत्परः ॥84॥

क्षीरशायी क्षणेशानः क्षोणिभृत्क्षणदोत्सवः।
क्षेमङ्करः क्षमालुब्धः क्षमाशास्त्र-विशारदः ॥85॥

क्षमीश्वरः क्षमाकामः क्षमाहृदयमण्डनः।
नीलाद्रिरुचिरोळेशो नीलपर्वत-सन्निभः ॥86॥

पाठांतर—1. क्षोभप्रदः 2. क्षमधारी क्षमाधरः 3. पालः 4. क्षुद्रासनः

नीलमणिप्रभारम्यः शशिभूषण-भूषितः।
[1]शशधरः शरीभूतो मुण्डमाला-विभूषितः ॥87॥

मुण्डस्थो मुण्ड-सन्तुष्टो मुण्डमालधरोऽनघः।
दिग्वासा विदिगाकारो दिगम्बरवरप्रदः ॥88॥

दिगम्बरीश आनन्दो दिगम्बर-तनूद्भवः।
पिङ्गलैकजटो धृष्टो डमरूवादनप्रियः ॥89॥

सृणीकरः सृणीशानः खड्गधृक् खड्गपालकः।
शूलहस्तो मतङ्गाभो मातङ्गोत्सवसुन्दरः ॥90॥

अभयङ्कर ऊर्वङ्गो लंकापति-विनाशनः।
नगाशयो नगेशानो नागमण्डल-मण्डितः ॥91॥

नगाकारो नगाधीशो नगशायी नगप्रियः।
घण्टोत्सवो घटाकारो घण्टावाद्य-विशारदः ॥92॥

कपालपाणिरम्बेशः कपालासनसारदः।[2]
पद्मपाणिः रालास्यस्त्रिनेत्रो नागवल्लभः ॥93॥

किङ्किणीजालसन्तुष्टो जलप्रायो जलाकरः।
अपमृत्युहरो मायामोहमूल-विनाशनः ॥94॥

आयुष्कः कमलानाथः कमलाकान्तवल्लभः।
राज्यदो राजराजेशो राजीवपद-शोभनः ॥95॥

डाकिनीनायको नित्यो नित्यधर्मपरायणः।
डाकिनीहृदयज्ञानी डाकिनीदेहनाशकः ॥96॥

डाकिनी-प्राणदः शुद्धः श्रद्धेयचरितो विभुः।
हेमप्रभो हिमेशानो हिमानीप्रियदर्शनः ॥97॥

हेमदो मर्मदो नामी नामधेयो नगात्मजः।
वैकुण्ठो वासुकिप्राणो वासुकी-कण्ठभूषणः ॥98॥

---

1. अन्यत्र यह पंक्ति नहीं है। पाठांतर—2. सादन.

कुण्डलीशो मखध्वंसी मखराजो मखेश्वरः।
मखाकारो मखाधीशो मखमाला-विभूषणः ॥99॥

अम्बिका वल्लभो वाणीपतिर्वाणी-विशारदः।
वाणीशो वाचः प्राणश्च वचनस्थो वन-प्रियः ॥100॥

वेलाधरो दिशामीशो दिङ्नागो हि दिगीश्वरः।
दूर्वाप्रियो दुराराध्यो दारिद्रय-भयभञ्जनः[1] ॥101॥

तर्कस्तर्कप्रियस्तर्क्यो वितर्क्कस्तर्कवल्लभः।
तर्कसिद्धोऽतिसिद्धात्मा सिद्धदेहो गुहाशयः ॥102॥

ग्रहगर्भो ग्रहेशानो गन्धगन्धो विशारदः।
मङ्गलो मङ्गलाकारो मङ्गलवाद्य-वादकः ॥103॥

मङ्गलीशो विमानस्थो विमानो नैकनायकः[2]।
बुधेशो बिबुधाधीशो बुधवारो बुधाकरः ॥104॥

बुधनाथो बुधप्रीतो बुधवन्द्यो बुधाधिपः।
बुधसिद्धो बुधप्राणो बुद्धबुद्धो बुधप्रियः ॥105॥

सोमप्रभो मनःसिद्धो मनोज-प्राणनाशनः।
सामेशो मशकाकारो सोमपाः सोमनायकः ॥106॥

कामगः कामहा बौद्धः कामनाफलदोऽधिपः।
त्रिदशो दशरात्रेशो दशानन-विनाशनः ॥107॥

लक्ष्मणो लक्ष्यसम्भर्त्ता[3]लक्ष्यसंख्यो मनःप्रियः।
विभावसुर्नलेशानो नायको नगजाप्रियः ॥108॥

नलकान्तिर्नलोत्साहो नरदेवो नराकृतिः।
नरपतिनरिशानो नारायणो नरेश्वरः ॥109॥

अनिलो मारुतो मांसो मांसैकरससेवितः।
मरीचिरमरेशानो मागधो मगधप्रभुः ॥110॥

पाठांतर—1. दारिद्रयभञ्जन क्षमः 2. विमानस्यैकनायकः 3. लक्षसंवर्त्ति

सुन्दरो सेवकोद्वारी द्वारदेशनिवासनः।
देवकीगर्भसञ्जातो देवकी-सेवकः कुजः[1] ॥111॥

बृहस्पतिः कविः शुक्रः शारदासाधकप्रियः।
शारदासाधकः प्राणः शारदासेवकोत्सुकः ॥112॥

शारदासाधक-श्रेष्ठो वीतरागो जगत्प्रभुः।
मांसप्रियो मधुप्राणो मधुमास-महोत्सवः ॥113॥

मधुपो मधुपश्रेष्ठो मधुपानसदारतिः।
मोदकादान-सम्प्रीतो मोदकामोदमोहितः ॥114॥

आमोदानन्दितो नन्दो नन्दिकेशो नदेश्वरः।
नदीप्रियो नदीनाथो नदीतीररुहस्तपाः ॥115॥

तपनस्तापनस्तप्ता[2] तापहा तापकारकः।
पतङ्गो गोमुखो गौरो गोपालो गोपवर्द्धनः ॥116॥

गोपतिर्गोपसंहर्ता गोवृन्दैकप्रियोऽतिगः।
गर्विष्ठो गुणरम्यश्च गुणसिन्धुर्गुरुप्रियः ॥117॥

गुणपूज्यो गुणोपेतो गुणवाद्यो गुणोत्सुकः।
गुणीशः केवलो गर्भः सुगर्भो गर्भरक्षकः ॥118॥

गाम्भीर्यधारको धर्त्ता विधर्ता धर्मपालकः।
जगदीशो जगन्मित्रो जगत्त्राता जगत्प्रभुः[3] ॥119॥

जगद्धाता जगद्भोक्ता जगज्जाड्य विनाशनः।
जगत्कर्ता जगद्धर्ता जगज्जीवन-जीवनः ॥120॥

मालतीपुष्प-सम्प्रीतो मालती-कुसुमोत्सुकः।
मालतीकुसुमाकारो मालती-कुसुमप्रभः ॥121॥

रसालमञ्जरीरम्यो रसगन्ध-निषेवितः।[4]
रसालमञ्जरीलुब्धो रसालतरूवल्लभः। ॥122॥

पाठांतर—1. कुहूः 2. तप्र 3. जगत्प्रियः 4. यह अर्धश्लोक नहीं है।

रसालतरुवासी वै रसालफलसुन्दरः।
रसालरससन्तुष्टो रसालरसलालसः[1] ॥123॥

केतकी-पुष्पसन्तुष्टो केतकीगर्भसम्भवः।
केतकीपत्र-संकाशः केतकी-प्राणनाशनः ॥124॥

गर्त्तस्थो गर्त्तगम्भीरो गर्त्तेशो गर्त्तनायकः।
गर्त्तगेशोऽतिगर्त्तस्थो गर्त्ततीरनिवासकः ॥125॥

गणसेव्यो गणाध्यक्षो गणराजो गणाह्वयः।
आनन्दभैरवो भीरुर्भैरवेशो रुरुर्भगः ॥126॥

सुब्रह्मभैरवो वामभैरवो भूतभावनः।
भैरवी-त्तनयो देवीपुत्रः पर्वतसम्भवः ॥127॥

यहां तक श्री बटुकभैरव के सहस्रनाम कहे गए हैं। इसके पश्चात इस 'श्री-बटुकभैरव-सहस्रनाम' के स्रोत के पाठ का फल कहा जाता है—

नाम्नाऽनेन सहस्रेण स्तुत्वा बटुकभैरवम्।
लभते ह्यतुलां लक्ष्मीं देवानामपि दुर्लभाम् ॥128॥

उपदेशं गुरोर्लब्ध्वा योगे त्रिमंगली भवेत्।
अष्टम्यां वा चतुर्दश्यां वासरे भूमिसम्भवे ॥129॥

शुक्रे वा रविसंक्रांतौ योगोऽयमुत्तमः प्रभो।
तस्मिन् योगे महेशानि सर्वसिद्धिमवाप्नुयात् ॥130॥

लक्षमावर्त्तयेन्मन्त्री मन्त्रराजं नगेश्वरि।
नित्यकर्म सुसिद्ध्यर्थं तत्फलं लभते ध्रुवम् ॥131॥

स्तवमेनं-पठेन्मन्त्री पाठयन् वा यथाविधि।
दुर्लभां लभते सिद्धिं सर्वदेव-नमस्कृताम् ॥132॥

न प्रकाश्यं च पुत्रेषु भ्रष्टेषु तु कदाचन।
अन्यथा सिद्धिरोधः स्याद् वातुलो वा भवेत्प्रियः ॥133॥

पाठांतर—1. गन्ध-लालसः

स्तवस्यास्य प्रसादेन देवनायकवत्प्रियः।
सङ्ग्रामे विजयेच्छत्रून्मातङ्गानिव केसरी ॥134॥

राजानं वशयेत् सद्यो देवानपि वशं नयेत्।
किं वा परं फलं नाथ! स्तवराजस्य कथ्यताम् ॥135॥

यद्यन्मनसि सङ्कल्प स्तवमेनमुदीरयन्।
तत्तदाप्नोति देवेश बटुकस्य प्रसादतः ॥136॥

आपदां हि विनाशाय कारणं कान्त-दुर्लभम्।
देवासुररणे घोरे देवानामुपकारकम् ॥137॥

प्रकाशितं मया नाथ तन्त्रे भैरवदीपके।
अपुत्रो लभते पुत्रं षण्मासान् निरतो नरः ॥138॥

पठित्वा पाठयित्वाऽपि स्तवराजमनुत्तमम्।
दरिद्रो लभते लक्ष्मीमीप्सितामपि निश्चलाम् ॥139॥

कन्यार्थी लभते कन्यां सर्वरूपसमन्विताम्।
प्रदोषे बलिदाने च वशयेदखिलं जगत् ॥140॥

वटे वा बिल्वमूले वा रम्भायां विपनेऽपि वा।
जपेत्सततमालक्षं मन्त्रराजस्य सिद्धये ॥141॥

वर्णलक्षं जपेद्वापि दिङ्मात्रं हि प्रदर्शितम्
पूजयेत्तु तिलैर्माषैर्दुग्धैर्मांसैर्झषैस्तथा ॥142॥

घृतपक्वान्नतो वाऽपि जेमनै रससंकुलैः।
पूजयेद्धारयेद्व वाऽपि स्तवमेनं सुसाधकः ॥143॥

पठेद् वा पाठयेद् वाऽपि यथाविधि सुरप्रिये।
शत्रुतो न भयं तस्य नाग्निचोरास्त्रवज्रजम् ॥144॥

ज्वरादिसम्भवं वापि सत्यं सत्यं महेश्वरि।
भैरवाराधनाशक्तो यो भवेत्साधकः प्रभो ॥145॥

सदाशिवः स विज्ञयो भैरवेणेति भाषितम् ॥146॥
श्रीमद्भैरवराजरञ्जनविधौ वैय्यग्रमासेदुषः।

पुंसः पञ्चविधा भवन्ति नवधा ह्यष्टौ तथा सिद्धयः।
क्षोणीपाल-किरीट-कोटिमणिरुन्मालाभरैर्भूयशो-
मौग्ध्यं पादपयोजयोर्विजयते मूर्ध्नि प्रभोश्छत्रताम् ॥147॥

जो व्यक्ति इस श्रीबटुकभैरव सहस्रनाम स्रोत का यथाविधि पाठ करता है, वह दुर्लभ सिद्धियां पा लेता है। यह स्रोत कुपात्र को नहीं बताना चाहिए। वट, बिल्व अथवा केले के वृक्ष के नीचे बैठकर अथवा वन में जाकर जो व्यक्ति इस स्रोत का निरन्तर एक लाख की संख्या में जप करता है उसे यह मन्त्रराज सिद्ध हो जाता है और उसकी समस्त मनोकामनाएं पूर्ण होती हैं।

इति श्रीभैरवन्त्रोक्तं श्रीबटुकभैरवसहस्रनामस्तोत्रं समाप्तम्

प्रातःपठनीय श्रीबटुक भैरव के भयनाशक दसनाम

कपाली कुण्डली भीमो भैरवो भीमविक्रमः।
व्यालोपवीती कवची शूली शूरः शिवप्रियः ॥
एतानि दशनामानि प्रातरुत्थाय यः पठेत्।
भैरवी-यातना न स्याद् भयं क्वापि न जायते ॥

इन दस नामों से पूजा और नमस्कार भी किया जाता है तदर्थ इस प्रकार बोलें–

1. ॐ ह्रीं कपालिने नमः।
2. ॐ ह्रीं कुण्डलिने नमः।
3. ॐ ह्रीं भीमाय नमः।
4. ॐ ह्रीं भैरवाय नमः।
5. ॐ ह्रीं भीमविक्रमाय नमः।
6. ॐ ह्रीं व्यालोपवीतिने नमः।
7. ॐ ह्रीं कवचिने नमः।
8. ॐ ह्रीं शूलिने नमः।
9. ॐ ह्रीं शूसय नमः।
10. ॐ ह्रीं शिवप्रियाय नमः।

प्रतिनाम-नमस्कार-युतं 'रुद्रयामल'-प्रोक्तं श्रीबटुक-भैरव-सहस्रनाम-स्तोत्रम्

ॐ ब्रह्मादि-कारणातीतं स्वशक्त्यानन्दनिर्भरम्।
नमामि परमेशानं स्वच्छन्दं वीरनायकम् ॥1॥

प्रणति-मंगल—ॐ ब्रह्मादि देवों के कारण से रहित, स्वशक्ति के साथ आनन्द में लीन, परमशिवस्वरूप, स्वच्छन्द वीर नामक भगवान् अघोरभट्टारक को मैं प्रणाम करता हूं ॥1॥

कैलासशिखरासीनं देवदेवं जगद्गुरुम्।
पप्रच्छ प्रणता देवी भैरवं विगतामयम् ॥2॥

स्तोत्रावतरणिका—किसी समय कैलास-शिखर पर विराजमान प्रसन्नचित्त, देवाधिदेव, जगद्गुरु, श्रीस्वच्छन्दभैरव को प्रणाम करके भगवती जगदम्बा ने उनसे पूछा ॥2॥

श्रीदेव्युवाज

प्रायश्चित्तेषु सर्वेषु समयोल्लङ्घनेषु च।
महाभयेषु घोरेषु तीव्रोपद्रवभूमिषु ॥3॥
छिद्रस्थानेषु सर्वेषु सदुपायं वद प्रभो।
येनायासेन रहितो निर्दोषश्च भवेन्नरः ॥4॥

श्रीदेवी ने कहा—हे प्रभो! सभी प्रकार के प्रायश्चित्त, समय (शास्त्र-आचार) का उल्लंघन, तीव्र उपद्रवों की स्थिति तथा सर्वविध दोषस्थानों के विद्यमान रहने पर भी साधक सरलता-पूर्वक उन दोषों से मुक्त होकर साधना कर सके ऐसा कोई उत्तम उपाय बतलाइये।

श्रीभैरव उवाच

शृणु देवि परं गुह्यं रहस्यं परमाद्भुतम्।
सर्वपाप-प्रशमनं सर्वदुःख-निवारणम् ॥5॥
प्रायश्चित्तेषु सर्वेषु तीव्रेष्वपि विशोधनम्।
सर्वच्छिद्रापहरणं सर्वार्ति-विनिवारकम् ॥6॥
समयोल्लङ्घने घोरे जपादेव विमोचनम्।
भोग-मोक्षप्रदं चैव सर्वसिद्धि-फलावहम् ॥7॥

श्रीभैरव ने कहा—हे देवि! परम गुप्त, परम अद्भुत रहस्यरूप, सर्वविध पापों का शमन करने वाला, सर्व दुःखों का निवारक, सभी प्रकार के तीव्र अथवा सामान्य प्रायश्चित्तों का शोधक, सर्वविध त्रुटियों को दूर करने वाला, समस्त पीड़ाओं का निवारक, घोर समय-शास्त्र के आचार का उल्लंघन होने पर भी केवल जप-मात्र से ही उसके दोष से मुक्त कराने वाला, भोग एवं मोक्ष का दाता और सर्वसिद्धिप्रद ऐसे (श्रीबहुरूपगर्भ) स्तोत्र को मैं कहता हूं। इसे तुम सावधान होकर सुनो।

शतजाप्येन शुद्ध्यन्ति, महापातकिनोऽपि ये।
तदर्धं पातकं हन्ति तत्पादेनोपपातकम् ॥8॥

स्तोत्र-जप (पाठ) का माहात्म्य—इस (मेरे द्वारा प्रोक्त-श्रीबहुरूपगर्भस्तोत्र) का सौ बार जप (पाठ) करने से जो महापापी हैं, वे भी शुद्ध हो जाते हैं। पचास बार पाठ करने से पाप का नाश होता है तथा पचीस बार पाठ करने से उपपातकों का नाश होता है ॥8॥

कायिकं वाचिकं चैव मानसं स्पर्शदोषजम्।
प्रमादादिच्छया वापि सकृज्जाप्येन शुद्ध्यति ॥9॥

प्रमादवश अथवा इच्छापूर्वक किये गये कायिक, वाचिक, मानसिक और स्पर्श के कारण उत्पन्न दोष इस स्तोत्र के एक बार पाठ करने से ही दूर हो जाते हैं।

यागारम्भे च यागान्ते पठितव्यं प्रयत्नतः।
श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महत् ॥10॥

पूजा अथवा यज्ञ आदि कर्मों के आरम्भ और अन्त में इस स्तोत्र का पाठ करना चाहिए तथा भक्तिपूर्वक इसका श्रवण करना चाहिए। यह स्तोत्र अत्युत्तम एवं कल्याण करने वाला है।

नित्ये नैमित्तिके काम्ये परस्याप्यात्मनोऽपि वा।
निश्छिद्रकरणं प्रोक्तमभावपरिपूरकम् ॥11॥

यह स्तोत्र किसी अन्य यजमान के लिए अथवा स्वयं के लिए किए जाने वाले नित्य, नैमित्तिक एवं काम्यकर्मों में अज्ञानवश रह जाने वाली त्रुटियों के दोषों को दूर करने वाला और अभावों की पूर्ति करने वाला कहा गया है।

द्रव्यहीने मन्त्रहीने ज्ञानयोग-विवर्जिते।
भक्तिश्रद्धा-विरहिते शुद्धिशून्ये विशेषतः ॥12॥
मनो-विक्षेपदोषे च विलोमे पशुवीक्षिते।
विधिहीने प्रमादे च जप्तव्यं सर्वकर्मसु ॥13॥

द्रव्यहीन, मन्त्रहीन, ज्ञान एवं योग से रहित और भक्ति तथा श्रद्धा से शून्य कर्म करने की स्थिति में एवं शुद्धता का अभाव, मन की अस्थिरता, विपरीत क्रिया, पशु (आचार शून्य-व्यक्ति द्वारा) दृष्ट, विधि रहित तथा प्रमाद के कारण हुई त्रुटियों के होने से उत्पन्न दोषों की निवृत्ति के लिए सभी कर्मों में इस स्तोत्र का पाठ करना चाहिए।

नातः परतरो मन्त्रो नातः परतरः स्तवः।
नातः परतरा काचित् सम्यक् प्रत्यङ्गिरा प्रिये! ॥14॥

हे प्रिये! इस स्तोत्र से बढ़कर न तो कोई मन्त्र है और न स्तोत्र। तथा इससे अधिक महत्ववाली कोई उत्तम प्रत्यङ्गिरा (कृत्यादिदोषशमनी विद्या) भी नहीं है।

इयं समग्रविद्यानां राजराजेश्वरीश्वरि!।
परमाप्यायनं देवि! भैरवस्य प्रकीर्तितम् ॥15॥

हे ईश्वरी! यह स्तोत्रविद्या समस्त विद्याओं की राजराजेश्वरी है, तथा यह स्तोत्र भैरव को पूर्णतः सन्तुष्ट करने वाला कहा गया है।

प्रीणनं सर्वदेवानां सर्व-सौभाग्य-वर्धनम्।
स्तवराजमिमं देवि शृणुष्वावहिता प्रिये ॥16॥

हे प्रिय देवी, सभी देवताओं को प्रसन्न करने वाले तथा सर्वविध सौभाग्य को बढ़ाने वाले इस 'बहुरूपगर्भ-स्तवराज' को सावधान होकर सुनो ॥16॥

अथ विनियोग : अस्य श्रीमदघोरभट्टारक-सकल-स्वच्छन्द-भैरवमन्त्रस्य श्रीकालाग्निरुद्रभैरव ऋषिः पङ्क्तिश्छन्दः सकलभट्टारकाघोरमूर्तिर्देवता ॐ बीजं, ह्रीं शक्तिः, कुरु कुरु कीलकं, श्रीबहुरूपगर्भप्रीत्यर्थं पाठे विनियोगः।

इस अघोरभट्टारक, सकल-स्वच्छन्द भैरव मन्त्र (स्तोत्र) के कालाग्नि-भैरव ऋषि, पङ्क्ति छन्द, सकल भट्टारक अघोरमूर्ति देवता, ॐ बीज, ह्रीं शक्ति और कुरु कुरु कीलक हैं। भगवान् बहुरूपगर्भ की प्रसन्नता के लिए मैं पाठ करता हूं, ऐसी भावना करके संकल्प जल छोड़ दे।

ध्यानम्

वामे खेटकपाशशार्ङ्गविलसद्-दण्डं च वीणाष्टिके,
बिभ्राणं ध्वजमुद्गरौ स्वनिभदेव्यङ्कं कुठारं करे।
दक्षेऽप्यङ्कुशकन्दलेषु-डमरून् वज्रं त्रिशूलाभयान्,
रुद्रस्थं शरवक्त्रमिन्दुधवलं स्वच्छन्दनाथं स्तुमः ॥

रुद्र के पृष्ठ पर विराजमान, पञ्चमुख, चन्द्रमा के समान गौरवर्ण, अपने ही समान स्वरूपवाली देवी स्वच्छन्द भट्टारक शक्ति जिसके अङ्क में स्थित है तथा जो बायें हाथ में–'1. खेटक, 2. पाश, 3. धनुष, 4. दण्ड, 5. वीणा, 6. क्षुद्रघण्टिका, 7. ध्वज, 8. मुद्गर एवं 9. वरदमुद्रा' तथा उसी प्रकार दायें हाथ में–'1. परशु, 2. अङ्कुश, 3. इक्षुकाण्ड बाण, 4. डमरू, 5. वज्र, 6. त्रिशूल, 7. अभयमुद्रा, 8. मुण्ड तथा 9. खट्वाङ्ग' आयुध धारण किये हुए हैं, ऐसे भगवान स्वच्छन्दनाथ भैरव की हम स्तुति/ध्यान करते हैं।'

मूल-स्तोत्रपाठ–

ॐ नमः परमाकाशशायिने परमात्मने।
शिवाय परसंशान्त-निरानन्दपदाय ते ॥1॥

परमशिवात्मिका स्वभित्ति स्वशक्ति में विश्राम करने वाले, परम शान्त एवं अक्षुब्ध, आणवोपायगत उच्चाराभ्यास में साक्षात्कारणीय, छह आनन्द की भूमिकाओं में से द्वितीय भूमिका द्वारा प्राप्य, निरानन्दपदरूप तथा महाप्रकाशमय, निजस्वरूप परामर्शात्मा सदाशिव के लिए नमस्कार हो।

अवाच्यायाप्रमेयाय प्रमात्रे विश्वहेतवे।
महासामान्यरूपाय सत्तामात्रैकरूपिणे ॥2॥
घोषादि-दशधा शब्द-बीजभूताय शम्भवे।
नमः शान्तोग्रघोरादि-मन्त्रसन्दर्भगर्भिणे ॥3॥

विकल्पात्मक विज्ञान द्वारा अगोचर अथवा नादरूप, निर्विकल्पात्मक विज्ञान द्वारा अपरिच्छेद्य, प्रमाता, समस्त ज्ञेयमात्र माया से क्षिति-पर्यन्त विश्व को स्वेच्छा से स्वाश्रय में उन्मीलन करने से उसके कारणभूत, अत्यन्त असामान्यरूप प्रकाश-मात्ररूप होने के कारण सत्तामात्रैकवेद्य तथा घोषादि दशविध शब्द-नाद के आदिकारण अथवा अनाहत ध्वनि के परमार्थ रूप महामन्त्र के वीर्यरूप; स्वच्छन्द, निष्कल, अशेष विश्व की समरसता से वेद्य शिरोरूपाकार कला के द्वारा घोरतर शक्तिचक्र के क्रम से–ब्रह्मा, विष्णु और रुद्र; पार्थिव, प्राकृत एवं मायीय अण्ड; जागर, स्वप्न तथा सुषुप्त; प्रमेय, प्रमाण

और प्रमाता के सृष्टि-स्थिति-संहार-विलयरूप भेदों के द्वारा दृश्यमान जगत् जिसमें अभेदरूप से स्थित है ऐसे भगवान् बहुरूप, शान्त, उग्र-घोरादि-मन्त्रों के सन्दर्भ से गर्भित सदाशिव के लिए नमस्कार हो।

रेवतीसङ्गविस्रम्भ-समाश्लेष-विलासिने।
नमः समरसास्वाद-परानन्दोपभोगिने ॥4॥

'र च ई च ते रे' अथवा 'र च ई च यौं' बीजमन्त्र वर्णों में निहित रे वर्णद्वय अथवा र और य वर्ण जिसमें विद्यमान हैं, ऐसी रेवती शक्ति के विभ्रमरूप सामरस्य से तन्मयतारूप विलास करने वाले तथा समरसास्वाद परमानन्द के उपभोक्ता शिव के लिए नमस्कार हो।

भोगपाणे नमस्तुभ्यं योगेशीपूजितात्मने।
द्वय-निर्दलनोद्योग-समुल्लासितमूर्तये ॥5॥

योगेशी अथवा योगेशों द्वारा पूजित तथा शक्ति और शक्तिमान् के भेद का खण्डन-निर्दलन करने की प्रवृत्ति के कारण समुल्लासित स्फूर्तिशाली भैरव शक्ति-रूप के लिए नमस्कार हो ॥5॥

थरत्प्रसरविक्षोभ-विसृष्टाखिलजन्तवे।
नमो मायास्वरूपाय स्थाणवे परमेष्ठिने ॥6॥

शान्त, परमशिव तथा अनुत्तरमूर्ति की जगत् निर्माणरूप इच्छा से जो विस्तृत विक्षोभ हुआ उससे अखिल जीव सृष्टि करने वाले मायास्वरूप, अविचल; अविनश्वर तथा परमपद में स्थित भगवान 'बहुरूप' के लिए नमस्कार हो।

घोरसंसारसम्भोगदायिने स्थितिकारिणे।
कलादिक्षितिपर्यन्तं पालिने विभवे नमः ॥7॥

अत्यन्त भयानक संसाररूप कष्ट के अनन्त प्रकाशमय सुख-दुःखादि का उपभोग कराने वाले, स्थितिनामक परेश्वर की कृत्या-विशेष के कर्ता अथवा संसार के रूप में निजरूप को व्यक्त करने वाले, कला से पृथिवी तत्त्व पर्यन्त मायीय तत्त्व वर्ण के पालक और स्वल्पकाल के लिए उसके स्थापक तथा स्वयं संसरण रहित अथवा संसरण शील भगवान बहुरूप के लिए नमस्कार हो ॥7॥

रेहणाय महामोहध्वान्तविध्वंसहेतवे।
हृदयाम्बुजसङ्कोचभेदिने शिवभावने ॥8॥

प्रकाशात्मा महामोहरूप अज्ञानान्धकार का विध्वंस करने में कारणभूत तथा हृदय-कमल को विकसित करने वाले शिवरूपी सूर्य के लिए नमस्कार हो।

भोग-मोक्ष-फलप्राप्ति-हेतु-योग-विधायिने।
नमः परम-निर्वाण-दायिने चन्द्रमौलये ॥9॥

भोग और विद्याविद्येश्वरत्व-प्राप्तिरूप मोक्ष की प्राप्ति के लिए संयोग बनाने वाले, सायुज्य प्राप्ति रूप परम निर्वाण के दाता एवं विश्व को सिक्त करने वाली 'अमा'-नामक अमृत कला रूप चन्द्र को सिर पर धारण करने वाले चन्द्रमौलि भगवान स्वच्छन्दनाथ के लिए नमस्कार हो।

घोष्याय सर्वमन्त्राणां सर्ववाङ्मयमूर्त्तये।
नमः शर्वाय सर्वाय सर्वपापाहारिणे[1] ॥10॥

मनन एवं त्राण-स्वभावात्मक समस्त मन्त्रों द्वारा सम्बोध्य, परविमर्शरूप विश्वात्मक अखिल विमर्श के बीजभूत—'विमर्शात्मक वाक्तत्त्वरूप' सर्व वाङ्मय मूर्ति, सर्वपाप निवारक, सृष्टि, स्थिति एवं संहार-कर्ता तथा सभी के शरणभूत भेदमय मायीयस्वरूप (श्रीस्वच्छन्दनाथ) के लिए नमस्कार हो।

रवणाय रवान्ताय नमस्तेऽरावराविणे।
नित्याय सुप्रबुद्धाय सर्वान्तरतमाय ते ॥11॥

नाद, नादान्त, अनाहत, नित्य, सुप्रबुद्ध एवं सर्वान्तरतम—सर्वान्तर्यामी के लिए नमस्कार हो।

घोष्याय परनादान्तश्चराय खचराय ते।
नमो वाक्पतये तुभ्यं भवाय भवभेदिने ॥12॥

घोषणीय, परनाद के अधिष्ठाता, भावशून्य में विचरण करनेवाले, वाणी के स्वामी, संसाररूप शिव तथा संसार के बन्धन से छुड़ाने वाले प्रभु, बहुरूप के लिए नमस्कार हो।

रमणाय रतीशाङ्गदाहिने चित्रकर्मणे।
नमः शैलसुताभर्त्रे विश्वकर्त्रे महात्मने ॥13॥

समस्त चराचर में रमण करने वाले, कामदेव को भस्म करने वाले, अनन्त प्रकार की विचित्रता से युक्त सृष्टि, स्थिति, संहार, निग्रह और अनुग्रहरूप कर्म वाले, पार्वती के पति, विश्व के कर्ता एवं महात्मा (श्रीस्वच्छन्दनाथ) के लिए नमस्कार हो।

नमः पारप्रतिष्ठाय सर्वान्तपदगाय ते।
नमः समस्ततत्त्वाध्य-व्यापिने चित्स्वरूपिणे ॥14॥

स्वप्रकाशरूप, सर्वोपाधि रहित, छत्तीस तत्त्व; पद, मन्त्र, वर्ण, भुवन, तत्त्व और कलात्मक छह अध्वों में प्राप्त तथा चित्स्वरूप के लिए नमस्कार हो।

रेवद्वराय रुद्राय नमस्तेऽरूपरूपिणे।
परापरपरिस्पन्द-मन्दिराय नमो नमः ॥15॥

---

1. पाठांतर—सर्वपाशापहारिणे

रे अथवा र-य वर्णबीजवालों में उत्कृष्ट, रुद्र, रूपातीत, चिन्मय, शान्त एवं उदित शक्ति-स्वभाव के विश्रान्ति स्थान के लिए नमस्कार हो।

भरिताखिलविश्वाय योगगम्याय ते नमः।
नमः सर्वेश्वरेशाय महाहंसाय शम्भवे ॥16॥

अपनी ऐश्वर्य शक्ति से अखिल विश्व का भरण-पोषण करने वाले चराचर-रूप, चित्तवृत्ति निरोधरूप योग के द्वारा ज्ञेय एवं प्राप्त, सर्वेश्वर एवं महाहंस चिद्रूप भगवान् शिव के लिए नमस्कार हो।

चर्च्याय चर्चनीयाय चर्चकाय चराय ते।
रवीन्दु-सन्धिसंस्थाय महाचक्रेश ते नमः ॥17॥

स्मरणीय चर्चा-परामर्श के योग्य, चेतन-स्वभाव, स्पन्दात्मा तथा प्राणापान की सन्धि में स्थित अथवा प्राणापानरूप उभय मार्गगामी हे महाचक्रेश! आपके लिए नमस्कार हो।

सर्वानुस्यूत-रूपाय सर्वाच्छादकशक्तये।
सर्वभक्ष्याय सर्वाय नमस्ते सर्ववेदिने ॥18॥

सभी में सर्वत्र अन्तर्व्याप्त रूप वाले, सर्वत्र आच्छादिका-स्रोतोरूप शक्ति से सम्पन्न, सभी का अपने में संहरण करने वाले, सर्वज्ञ तथा सर्वरूप के लिए नमस्कार हो।

रम्याय वल्लभाक्रान्त-देहार्धाय विनोदिने।
नमः प्रपन्नदुष्प्राप्यसौभाग्यफलदायिने ॥19॥

रमणीय, अर्धनारीश्वर, विनोदी तथा शरणागत भक्तों की कठिनाई से प्राप्त होने वाले भोग-मोक्षात्मक सौभाग्य के दाता भगवान् स्वच्छन्दनाथ के लिए नमस्कार हो।

तन्महेशाय तत्त्वार्थ-वेदिने भवभेदिने।
महाभैरवनाथाय भक्तिगम्याय ते नमः ॥20॥

विद्या और अविद्यारूप उभयविध तत्त्व के वास्तविक अर्थ के वेत्ता, बार-बार के जन्म-मरण रूप बन्धन को नष्ट करने वाले, समावेशरसानुविद्ध व्यापारशालिनी भक्ति से ज्ञेय तथा महेश्वर उन महाभैरवनाथ के लिए नमस्कार हो।

शक्ति-गर्भप्रबोधाय शरण्यायाशरीरिणे।
शान्ति-पुष्ट्यादि-साध्यार्थ-साधकाय नमोऽस्तु ते ॥21॥

प्रकाश-विमर्शरूप, अशरीरी, शुद्धचिदेकरूप, शरणागतरक्षक तथा शान्तिपुष्टि आदि कर्मों के साधक के लिए नमस्कार हो।

रवत्कुण्डलिनी-गर्भ-प्रबोधप्राप्तशक्तये।
उत्स्फोटनापटुप्रौढपरमाक्षरमूर्तये ॥22॥

उन्निद्र कुण्डलिनी के अन्तःप्रबोध से सामर्थ्यशाली तथा विश्व-विस्तार में पटु एवं प्रौढ़, परमाक्षररूप के लिए नमस्कार हो।

समस्तव्यस्तसङ्ग्रस्त-रश्मिजालोदरात्मने।
नमस्तुभ्यं महामीनरूपिणे विश्वगर्भिणे ॥23॥

समस्त और व्यस्तरूप रश्मिजालमय शक्तिसमूह को आत्मसात करने वाले तथा जलरूप विश्व को अपने अन्तर में धारण करने वाले महामीनरूप हे परमात्मा, आपके लिए नमस्कार हो।

*(**विशेष**–जैसे जड़ जल में चेतन मत्स्य विचरण करता है, तो उससे वह जड़ जल भी चेतन प्रतीत होता है, उसी प्रकार चेतन परमात्मा के जड़ जगत् में व्याप्त होने के कारण जगत् भी चेतन प्रतीत होता है।)*

रेवारणिसमुद्भूत-वह्निज्वालावभासिने।
घनीभूतविकल्पात्मविश्वबन्धविलापिने ॥24॥
भोगिनीस्यन्दनारूढ़ि-प्रौढिमालब्ध-गर्विणे।
नमस्ते सर्वभक्ष्याय परमामृत-लाभिने ॥25॥

रेवा-शक्तिरूप अरणि से उद्भूत वह्निज्वालाओं द्वारा भासित, घनीभूत, विकल्परूप विश्वबन्धन को नष्ट करने वाले, कुण्डलिनी शक्ति के रथ पर आरूढ़ होने से प्राप्त प्रौढ़ता से पूर्ण, शिरःस्थित चन्द्रमा से विभूषित तथा सभी को आत्मसात करने वाले भगवान बहुरूप के लिए नमस्कार हो।

नफ-कोटिसमावेश-भरिताखिलसृष्टये।
नमः शक्तिशरीराय कोटिद्वितयसङ्गिने ॥26॥

न–आदि से **फ**–अन्त (अर्थात् न-प-फ) वर्णरूप मालिनी के आवेश से पूर्ण होकर सकल सृष्टि की रचना करने वाले, शक्ति-युक्त हे अर्धनारीश्वरमय शरीरधारी आपके लिए नमस्कार हो।

महामोहमलाक्रान्तजीववर्गविबोधिने।
महेश्वराय जगतां नमोऽकारणबन्धवे[1] **॥27॥**

महामोहात्मकमल से व्याप्त जीववर्ग को ज्ञानदान के द्वारा प्रबुद्ध बनानेवाले तथा प्राणिमात्र के अकारण-बन्धु अथवा जगत के कारणरूप, ब्रह्मादि-शिवान्त सभी को विभिन्न ऐश्वर्य प्रदान करके उनका परम उपकार करने वाले महेश्वर–शिव के लिए नमस्कार हो ॥27॥

1. तमःकारणबन्धवे–इत्यपि पाठः।

स्तेनोन्मूलनदक्षैक-स्मृतये विश्वमूर्तये।
नमस्तेऽस्तु महादेवनाम्ने पर-स्वधात्मने ॥28॥

केवल स्मरण से ही विघ्नरूप चोरों का उन्मूलन करने वाले, परामृतरूप एवं विश्वमूर्ति भगवान् महादेव के लिए नमस्कार है ॥28॥

रुग्द्राविणे महावीर्यरुरुवंश-विनाशिने।
रुद्राय द्रविताशेषबन्धनाय नमो नमः ॥29॥

रोगों अथवा मलों के निवारक, महान् पराक्रमी, विकल्पों के वंश के विनाशक तथा अशेष बन्धनों को नष्ट करने वाले भगवान रुद्र के लिए बार-बार नमस्कार हो।

द्रवत्-पर-रसास्वाद-चर्वणोद्यत-शक्तये।
नमस्त्रिदश-पूज्याय सर्वकारण-हेतवे ॥30॥

द्रवित होते हुए परमरस-परामृत के आस्वादन में सदा तत्पर ऐसी शक्ति वाले, त्रि-दशविध चररूप रहस्यद्रव्यों से पूज्य अथवा देवताओं से पूज्य तथा समस्त कारणों से भी कारणभूत उस परमात्मा के लिए नमस्कार हो।

रूपातीत नमस्तुभ्यं, नमस्ते बहुरूपिणे।
त्र्यम्बकाय त्रिधामान्तश्चारिणे चित्रचक्षुषे ॥31॥

हे रूपातीत! आपके लिए नमस्कार हो। ज्ञानादि तीन अम्बिका शक्तियों से उपास्य, सूर्य, चन्द्र और अग्निरूप धामत्रय के अधिष्ठाता एवं आश्चर्यरूप नेत्रों वाले बहुरूप प्रभो आपके लिए नमस्कार हो।

पेशलोपाय लभ्याय भक्तिभाजां महात्मनाम्।
दुर्लभाय मलाक्रान्तचेतसां तु नमो नमः ॥32॥

भक्तियुक्त महापुरुषों के लिए प्राणायामादि कष्टसाध्य उपायों के बिना ही सरल शाम्भव-शक्त्यादि उपायों से साक्षात्करणीय तथा आणव-मायीय स्वरूप घोर मलों से आक्रान्त चित्त वाले मनुष्यों के लिए दुर्लभ उस परमात्मा के लिए बार-बार नमस्कार हो।

भव-प्रदाय दुष्टानां भवाय भव-भेदिने।
भव्यानां त्वन्मयानां[1] तु सर्वदाय नमोनमः ॥33॥

दुष्टों को सांसारिक बन्धनों से कष्ट भोगने के लिए जन्म देने वाले, भव्यजनों को बन्धनमुक्त कराने के लिए जन्म-मरण से मुक्त करने वाले तथा भगवद् भक्ति-परायण, उत्तम मार्गानुयायी, मुमुक्षुओं को सर्वज्ञत्व एवं सर्वकर्तृत्वरूप परमैश्वर्य की अभिव्यक्ति से सर्वस्व प्रदान करने वाले भगवान

1. पाठांतर—तमःकारणबन्धवे

बहुरूप के लिए बार-बार नमस्कार हो।

अणूनां मुक्तये घोर-घोर-संसार-दायिने।
घोरातिघोर-मूढानां, तिरस्कर्त्रे नमो नमः ॥34॥

बद्ध आत्माओं की मुक्ति के लिए अत्यन्त घोर संसार विषय-वासना में लिप्तावस्था को देने वाले अथवा मुक्ति हेतु संसार (बार-बार जन्म लेने की स्थिति) का खण्डन करने वाले तथा घोर, अतिघोर एवं मूढ़ अथवा राजस, अतिराजस तथा तामसभाव के विनाशक परमात्मा के लिए बार-बार नमस्कार हो।

सर्वकारण-कलाप-कल्पितोल्लास-सङ्कुल-समाधिविष्टराम्।
हार्द-कोकनद-संस्थितामपि, तां प्रणौमि शिववल्लभामजाम् ॥35॥

साधकों के हृदयस्थल में स्थित होते हुए भी ब्रह्मादि सर्वकारण-समूह से कल्पित उल्लासजन्य स्वात्म-चमत्काररूप आनन्द से परिपूर्ण समाधि वाले शिव का आसन ही जिसका विश्राम स्थान है, उस उत्पत्ति-रहित 'अजा', आनन्दरूपा, शिव-वल्लभा-'शक्ति-सुन्दरी' को मैं प्रणाम करता हूं ॥35॥

सर्वजन्तुहृदयाब्ज-मण्डलोद्भूत-भाव-मधु-पान-लम्पटाम्।
वर्णभेद-विभवान्तर-स्थितां, तां प्रणौमि शिवल्लभामजाम् ॥36॥

समस्त ब्रह्मादि-स्थावरान्त जन्तु जिसके हृदय-कमल-मण्डलों में निरन्तर स्पन्दन होने से उत्पन्न, विविध विचित्र विकल्पात्मक भावरूप मधु के पान में तत्पर तथा अकारादि-हकारान्त वर्णों के भेदरूप ऐश्वर्य में व्याप्त रहने वाली मातृकारूपिणी उस शिववल्लभा अजा को मैं प्रणाम करता हूं।

इत्येवं स्तोत्रराजेशं, महाभैरव-भाषितम्।
योगिनीनां परं सारं, न दद्याद्यस्य कस्मचित् ॥37॥

इस प्रकार यह महान् स्तोत्रराज महाभैरव द्वारा कहा गया है। यह योगिनियों का परम सार है, यह स्तोत्र जिस किसी को नहीं देना चाहिए।

अदीक्षिते शठे क्रूरे, निःसत्त्वे शुचि-वर्जिते।
नास्तिके च खले मूर्खे, प्रमत्ते विप्लुतौजसे ॥38॥
गुरु-शास्त्र-सदाचार-दूषके कलह-प्रिये।
निन्दके जम्भके क्षुद्रे, समयघ्ने च दाम्भिके ॥39॥
दाक्षिण्य-रहिते पापे, धर्म्महीने च गर्विते।
भक्तियुक्ते प्रदातव्यं, न देयं पर-दीक्षिते ॥40॥

जिसने दीक्षा प्राप्त नहीं की हो और जो मायावी क्रूर, मिथ्याभाषी, अपवित्र, नास्तिक, दुष्ट, मूर्ख, प्रमादी, शिथिलाचारी, गुरु, शास्त्र तथा सदाचार

1. 'तन्मयानाम्'—इत्यपि पाठः

के निन्दक, कलहकारी, दोषदर्शी, आलसी, क्षुद्र, सम्प्रदाय-विच्छेदक अथवा प्रतिज्ञा-भंग करने वाले, अभिमानी, अविनयी, पापी, धर्महीन अपने को बड़ा मानने वाला तथा जो अन्य सम्प्रदाय में दीक्षित हो, उसे भी यह स्तोत्रराज नहीं देना। यह भगवान स्वच्छन्द भैरव में भक्ति रखने वाले को ही देना चाहिए।

पशूनां सन्निधौ देवि! नोच्चार्यं सर्वथा क्वचित्।
अस्मैव स्मृतभात्रस्य, विघ्ना नश्यन्ति सर्वतः ॥41॥

आचारशून्य पशुओं के समक्ष कहीं भी—कदापि इस स्तोत्र का उच्चारण नहीं करना चाहिए। जो साधक उपर्युक्त दोषों से रहित होकर इस स्तोत्र का पाठ करता है, उसके स्मरणमात्र से ही सब दोष-विघ्न नष्ट हो जाते हैं।

गुह्यका यातुधानाश्च, वेताला राक्षसादयः।
डाकिन्यश्च पिशाचाश्च, क्रूरसत्त्वाश्च पूतनाः ॥42॥
नश्यन्ति सर्वे पठित-स्तोत्रस्यास्य प्रभावतः।
खेचरी भूचरी चैव, डाकिनी शाकिनी तथा ॥43॥

यक्ष, राक्षस, वेताल, अन्य दानवादि, डाकिनियां, पिशाच, क्रूर-स्वभाव वाली पूतनादि राक्षसियां, आकाश तथा भूतल पर विचरण करने वाली, डाकिनियां और शाकिनियां ये सभी इस स्तोत्र के पठनमात्र के प्रभाव से नष्ट हो जाते हैं।

ये चान्ये बहुधा भूता, दुष्ट-सत्त्वा भयानकाः।
व्याधि-दुर्भिक्ष-दौर्भाग्य-मारी-मोह-विषादयः ॥44॥
गज-व्याघ्रादये दुष्टाः पलायन्ते दिशोदश।
सर्वे दुष्टाः प्रणश्यन्ति, चेत्याज्ञा पारमेश्वरी ॥45॥

इनके अतिरिक्त जो भी अतिदुष्ट जीव हैं तथा रोग, दुर्भिक्ष, दौर्भाग्य, महामारी, मोह, विषप्रयोग, गज, व्याघ्र आदि दुष्ट पशु हैं, वे सभी दसों दिशाओं में भाग जाते हैं। सभी दुष्ट नष्ट हो जाते हैं। ऐसी परमेश्वर की आज्ञा है।

अपराधक्षमापनस्तोत्रम्[1]

गुरोः सेवां त्यक्त्वा गुरुवचनशक्तोऽपि न भवे,
भवत्पूजा–ध्यानाज्जप-हवन-यागाद्विरहितः।
त्वदर्च्चानिर्माणे क्वचिदपि न यत्नं च कृतवान्,
जगज्जालग्रस्तो झटिति कुरु हार्द मयि विभो ॥1॥

प्रभो दुर्गासूनो तव शरणतां सोऽधिगतवान्-
कृपालो दुःखार्तः कमपि भवदन्यं प्रकथये।
सुहृत् सम्पत् तेऽहं सरल-विरलः साधकजन–
स्त्वदन्यः कस्त्राता भवदहन-दाहं शमयति ॥2॥

वदान्यो मान्यस्त्वं विविध-जनपालो भवसि वै,
दयालुर्दीनार्तान् भव-जलधिपारं गमयसि।
अतस्त्वत्तो याचे नति-नियमतोऽकिञ्चनधनः,
सदा भूयाद् भावः पद नलिनयोस्ते तिमिरहा ॥3॥

अजापूर्वो विप्रो मिल-पदपरो योऽतिपतितो,
महामूर्खो दुष्टो वृजिन-निरतः पामर-नृपः।
असत्पानासक्तो यवन-युवतीव्रात-रमणः,
प्रभावात् त्वन्नाम्नः परम-पदवीं सोऽप्यधिगतः ॥4॥

दयां दीर्घां दीने बटुक कुरु विश्वम्भर! मयि,
न चान्यःसन्त्राता परमशिव मां पालय विभो।
महाश्चर्यं प्राप्तस्तव सरलदृष्ट्या विरहितः,
कृपा-पूर्णैर्नेत्रैः कमल-दल-तुल्यैरवतु माम् ॥5॥

---

1. श्रीभैरव नामावली पाठ, जप, दीपदान आदि किसी भी विधि की पूर्ति के पश्चात् इस स्तोत्र का पाठ करना चाहिए। इससे त्रुटियों का अपराध क्षमा हो जाता है तथा कृपा प्राप्त होती है।

सहस्ये किं हंसो नहि तपति दीनं जलमयं,
घनान्ते किं चन्द्रोऽसमकर-निपातो भुवितले।
कृपादृष्टेस्तेऽहं भयहर विभो किं विरहितो,
जले वा हर्म्ये वा घनरस-सुपातो न विषमः ॥6॥

त्रिमूर्त्तिस्त्वं गीतो हरिहर-विधातात्मक-गुणो,
निराकरः शुद्धः परतरपरः सोऽप्यविषयः।
दयारूपं शान्तं मुनिगणनुतं भक्तदयितं,
कदा पश्यामि त्वां कुटिलकचशोभित्रिनयनम् ॥7॥

तपो योगं साङ्ख्यं यमनियमचेतःप्रयजनं
न कौलार्च्चा-चक्रं हरिहरविधीनां प्रियतमम्।
न जाने ते भक्तिं परममुनिमार्ग मधुविधिं,
तथाप्येषा वाणी परिरटति नित्यं तव यशः ॥8॥

न मे काङ्क्षा धर्मे न वसु-निचये राज्यनिवहे,
न मे स्त्रीणां भोगे सखिसुतकुटुम्बेषु न च मे।
यदा यद्यद्भाव्यं भवतु भगवन् पूर्वसुकृतान्,
ममैतत्तु प्रार्थ्यं तव विमलभक्तिः प्रभवतात् ॥9॥

कियांस्तेऽस्मद्भारः पतितपतितांस्तारयसि भो,
मदन्यः कः पापी यजनविमुखः पाठरहितः।
दृढो मे विश्वासस्तव नियतिरुद्धारविषया,
सदा स्याद्विश्रम्भः क्वचिदपि मृषा मा च भवतात् ॥10॥

भवद्भावाभिन्नो व्यसन-निरतः को मदपरो,
मदान्धः पापात्मा बटुकशिव ते नामरहितः।
उदारात्मन् बन्धो नहि तवक-तुल्यः कलुषहा,
पुनः सञ्चिन्त्यैवं कुरु हृदि यथा चेच्छसि तथा ॥11॥

जपान्ते स्नानान्ते ह्युषसि च निशीथे पठति यो,
महत्सौख्यं देवो वितरति तु तस्मै प्रमुदितः।
अहोरात्रे पार्श्वे परिवसति भक्तानुगमनो,
वयोऽन्ते संहृष्टः परिनयति भक्तान् स्वभुवनम् ॥12॥

इति श्रीसिद्धयोगीश्वरश्रीघनैयालालशिष्येणात्मारामेण रचितं
श्रीबटुकप्रार्थनापराधक्षमापनस्तोत्रं समाप्तम्।

॥शुभमस्तु॥

श्री बटुक भैरव सात्विक स्वरूपम्

श्री बटुक भैरव राजसस्वरूपम्

श्री बटुक भैरव तामस स्वरूपम्

श्रीस्वर्णाकर्षण-भैरव साधना

श्री भैरव के अनन्त रूपों में स्वर्णाकर्षण-भैरव का स्वरूप भी परम उपास्य बतलाया गया है। इनकी साधना शान्तिक, पौष्टिक आदि सभी कर्मों में अत्यन्त सफल मानी गई है। अपने भक्तों की दरिद्रता को नष्ट करने तथा उसे धन-धान्य से समृद्ध बनाने के कारण ही आपका नाम 'स्वर्णाकर्षण-भैरव' के रूप में प्रसिद्ध है। तन्त्रशास्त्रों में इनकी साधना के लिए मन्त्रमय स्तोत्र, नामावली रूप स्तोत्र, कवच, सहस्त्रनाम एवं मन्त्र-जप का विधान विस्तार से वर्णित है।

रुद्रयामल में इनका वर्णन करते हुए जो ध्यान बतलाया है उसके अनुसार ये स्वर्ण के समान आकृति वाले, मन्दार के वृक्ष के नीचे माणिक्य के सिंहासन पर विराजमान, भक्तों को रत्न के पात्र में भरी हुई स्वर्णमुद्राओं को प्रदान करने वाले अत्यन्त दयालु देव हैं। अज नामक राक्षस का संहार इनके द्वारा हुआ था। ये त्रिनेत्र, चतुर्भुज, पाश, अंकुश, वर और अभयधारी, चन्द्रखण्ड, जटाजूट एवं स्वर्णाभरणों से विभूषित एवं सिद्ध विद्याधरों से सेवित बतलाये गए हैं।

इनके मन्त्र-विधान, स्तोत्र एवं कवच, सहस्त्रनाम, पूजा-यन्त्र आदि बहुत विस्तार से प्राप्त होते हैं। यन्त्र पूजा में पात्रासादन एवं आवरण-पूजा का भी पूरा विधाान है। हम यहां एक मन्त्र-विधान तथा एक स्तोत्र साधकों की सुविधा के लिये प्रकाशित कर रहे है।

श्रीस्वर्णाकर्षण भैरव-मन्त्र-विधान एवं स्तोत्र

'चिदम्बर-रहस्य' के अनुसार श्रीस्वर्णाकर्षण भैरव की उपासना के लिये हम यहां संक्षेप में मन्त्र-विधान एवं पाठ के लिये एक स्तोत्र दे रहे है, जो इस प्रकार है-

मन्त्र-विधान

1. **विनियोग**– ॐ अस्य श्रीस्वर्णाकर्षण भैरवमहामन्त्रस्य महाभैरव-ब्रह्मा ऋषिः त्रिष्टुपछन्दः त्रिमूर्तिरूपी[1] भगवान् स्वर्णाकर्षणभैरवो देवता ह्रीं बीजं सः शक्तिः वं कीलकं मम दारिद्र्यनाशार्थे जपे विनियोगः।

2. **ऋष्यादिन्यास– ॐ महाभैरवब्रह्मर्षये नमः** (शिरसि), **त्रिष्टुपछन्दसे नमः** (मुखे) **त्रिमूर्तिरूपि-भगवत्स्वर्णाकर्षणभैरवदेवतायै नमः** (हृदये), **ह्रीं बीजाय नमः** (गुह्ये), **सः शक्तये नमः** (पादयोः), **वं[2] कीलकाय नमः** (नाभौ), **विनियोगाय नमः** (सर्वाङ्गे)

3. **कर-न्यास-ॐ** (अंगुष्ठाभ्यां नमः)। **एं** (तर्जनीभ्यां नमः)। **क्लां ह्रां** (मध्यमाभ्यां नमः)। **क्लीं ह्रीं** (अनामिकाभ्यां नमः)। **क्लूं ह्रूं** (कनिष्ठिकाभ्यां नमः)। **सं वं** (करतलकर- पृष्ठाभ्यां नमः)।[3]

4. **हृदयादि न्यास- आपदुद्धरणाय** (हृदयाय नमः), **अजामलबद्धाय[4]** (शिरसे स्वाहा) **लोकेश्वराय** (शिखायै वषट्)। **स्वर्णाकर्षणभैरवाय** (कवचाय हुम्), **मम दरिद्र्यविद्वेषणाय**-(नेत्र त्रयाय दौपट्), **श्रीमहाभैरवाय नमः** (अस्त्राय फट्)।

---

1. हरिहरब्रह्मात्मक, यह पाठान्तर है। 2. भैरवायेति पाठा० 3. क्लीं क्लीं मध्य०। क्लीं ह्रीं अना०, ह्रीं ह्रीं कनि० ये सभी पाठ सम्भव हैं। अन्यत्र 10 बीजमन्त्र एवं मूलमन्त्र के 6 खण्डों से करन्यास करने का भी निर्देश है। 4. यहां अजाबलि और अजामिल पाठ भी हैं।

5. ध्यानम्-

ॐपीतवर्ण चतुर्बाहुं त्रिनेत्रं पीतवाससम्।
अक्षयं स्वर्णमाणिक्य-तडित्पूरितपात्रकम् ॥1॥

अभिलसन् महाशूलं चामरं तोमरोद्वहम्।
सततं चिन्तये देवं भैरवं सर्वसिद्धिदम् ॥2॥

मन्दारद्रुमकल्पमूलमहिते माणिक्य-सिंहासने।
संविष्टोदरभिन्नचम्पकरुचा देव्या समालिङ्गितः।
भक्तेभ्यः कररत्नपात्रभरितं स्वर्ण ददानो भृशं,
स्वर्णाकर्षण-भैरवो विजयते स्वर्णाकृतिः सर्वदा ॥3॥

इन पद्यों से ध्यान तथा मानसिक उपचारों से पूजा करके मन्त्र जप करे।

6. मूलमन्त्र –

ॐ ऐं क्लीं क्लीं क्लूं ह्रां ह्रीं ह्रूं सः वं आपदुद्धारणाय अजामलबद्धाय लोकेश्वराय स्वर्णाकर्षणभैरवाय मम दारिद्र्य विद्वेषणाय ॐ ह्रीं महाभैरवाय नमः।

इन मन्त्र का जप करें । 10 हजार जप करके दशांश, हवन, तर्पण, मार्जन और ब्राह्मण भोजन कराने से दरिद्रता का नाश, ऋण का निवारण तथा सर्वविध सुख की प्राप्ति होती है। पायस तथा बिल्व से हवन करें। कृष्णपक्ष की अष्टमी से चतुर्दशी तक जप का विशेष महत्त्व है।

श्रीस्वर्णाकर्षण-भैरव स्तोत्रम्

यह स्तोत्र 'रुद्रयामल' तन्त्र में ईश्वर और दत्तात्रेय के संवाद रूप में कहा गया है। इसके आरम्भ में श्रीमार्कण्डेय ऋषि ने इस स्तोत्र के लिए पूछा है तथा श्रीनन्दिकेश्वर ने लोकोपकार की दृष्टि से इसका कथन किया है। वहीं इसका फल कहा गया है कि-

यह दुर्लभ स्तोत्र है, सर्व पापों का नाशक है। सर्वविध सम्पत्ति का दाता, दरिद्रता को मिटाने वाला, आपत्तिनिवारक, अष्टविध ऐश्वर्य दाता, विजयप्रद, कीर्तिकारी, सौन्दर्यकर, स्वर्णदि अष्टसिद्धिदाता सर्वोत्तम एवं भुक्ति-मुक्ति को देने वाला है। महाभैरव के भक्त, सेवाभावी, निर्धन तथा गुरुभक्त को यह स्तोत्र देना चाहिए। इतना कहकर ब्रह्मा, विष्णु और

शिवरूप श्रीभैरव का यह स्तोत्र सुनाया गया है। इस स्तोत्र का विनियोग, ऋष्यादिन्यास, करन्यास, हृदयादिन्यास, ध्यान और मुद्राप्रदर्शन करके भक्तिपूर्वक पाठ करना चाहिए।

पूरा स्तोत्र तीन अंशों में हे, जिनमें पहला अंश स्तोत्र की प्राप्ति के उपक्रम और महत्त्व का सूचक है। दूसरा अंश मूल स्तोत्ररूप है, जिसमें श्रीस्वर्णाकर्षण भैरव के प्रस्तुत स्तोत्र के विनियोग, ऋष्यादिन्यास, करन्यांस, हृदयादिन्यास, ध्यान एवं मुद्रा-प्रदर्शन का निर्देश करके नमस्कार सहित नामावलीरूप स्तोत्र का पाठ दिया है। तीसरा अंश स्तोत्र की 'फलश्रुति' का है जिसमें स्तोत्र-पाठ के फल और पाठ-विधि के संकेत हैं।

स्तोत्र-प्रारम्भिका

(स्तोत्र-प्राप्ति का उपक्रम एवं महत्त्व)

भगवन् प्रमथाधीश शिवतुल्य-पराक्रम।
पूर्वमुक्तस्त्वया मन्त्रो भैरवस्य महात्मनः ॥1॥

इदानीं श्रोतुमिच्छामि तस्य स्तोत्रमनुत्तमम्।
तत्केनोक्तं पुरा स्तोत्रं पठनात् तस्य किं फलम् ॥2॥

तत्सर्वं श्रोतुमिच्छामि ब्रूहि मे नन्दिकेश्वर।

नन्दिकेश्वर उवाच

अयं प्रश्नो महाभाग! लोकानामुपकारकः ॥3॥

स्तोत्रं बटुकनाथस्य दुर्लभं भुवनत्रये।
सर्वपाप-प्रशमनं सर्वसम्पत्-प्रदायकम् ॥4॥

दारिद्र्यनाशनं पुंसामापदामपहारकम्।
अष्टैश्वर्यप्रदं नृणां पराजय-विनाशनम्॥5॥

महाकीर्त्तिप्रदं पुंसामसौन्दर्य-विनाशनम्।
स्वर्णाद्यष्ट - महासिद्धि - प्रदायकमनुत्तमम् ॥6॥

भुक्तिमुक्तिप्रदं स्तोत्रं भैरवस्य महात्मनः।
महाभैरवभक्ताय सेविने निर्धनाय च ॥7॥

निजभक्ताय वक्तव्यमन्यथाा शापमाप्नुयात्।
स्तोत्रमेतद् भैरवस्य ब्रह्म-विष्णु-शिवात्मकम् ॥8॥

शृणुष्व रुचितो ब्रह्मन् ! सर्वकाम- प्रदायकम्।

विनियोगः-

ॐ अस्य श्रीस्वर्णाकर्षणभैरव-स्तोत्रमन्त्रस्य ब्रह्मा ऋषिः अनुष्टुप्छन्दः स्वर्णाकर्षणभैरव-परमात्मा देवता ह्रीं बीजं क्लीं शक्तिः सः कीलकं मम सर्वकामसिद्ध्यर्ये पाठे विनियोगः।

ऋष्यादिन्यासः-

ब्रह्मर्षये नमः (शरसि), अनुष्टुप्छन्दसे नमः (मुखे), स्वर्णाकर्षण-भैरवपरमात्मने नमः (हृदये), ह्रीं बीजायः नमः (गुह्ये), क्लीं शक्तये नमः (पादयो), सः कीलकाय नमः (नाभौ), विनियोगाय नमः (सर्वाङ्गे)।

कर-हृदयादिन्यासाः-

	प्रथम बार	द्वितीय बार
ह्रां–	अंगुष्ठभ्यां नमः।	हृदयाय नमः।
ह्रीं–	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
ह्रुं–	मध्यमाभ्यां नमः।	शिखायै वषट्।
ह्रैं–	अनामिकाभ्यां नमः।	कवचाय हुम्।
ह्रौं–	कनिष्ठकाभ्यां नमः।	नेत्रत्राय वौषट्।
ह्रः–	करतल-करपृष्ठाभ्यां नमः।	अस्त्राय फट्।

ध्यानम्-

पारिजातद्रुकान्तारे, स्थिते माधिाक्य-मण्डपे।
सिंहासनगतं वन्दे, भैरबं स्वर्णदायकम्॥
गाङ्गेयपात्रं डमरुं त्रिशूलं, वरं करैः सन्दधतं त्रिनेत्रम्।
देव्या युतं तप्तसुवर्णवर्णं, स्वर्णाकृषं भैरवमाश्रयामि॥

मुद्रा - कमण्डलु-डमरु-त्रिशूल-वर-मुद्रा दर्शयेत्।

मूल-स्तोत्र-पाठः

ॐ नमस्ते भैरवाय ब्रह्मविष्णु - शिवात्मने।
नमस्त्रैलोक्यवन्द्याय वरदाय वरात्मने ॥1॥

रत्नसिंहासनस्थाय दिव्याभरणशोभिने।
दिव्यमाल्य-विभूषाय नमस्ते दिव्यमूर्तये ॥2॥

नमस्तेऽनेकहस्ताय अनेकशिरसे नमः।
नमस्तेऽनेकनेत्राय अनेकविभवे नमः ॥3॥

नमस्तेऽनेककण्ठाय अनेकांसाय ते नमः ।
नमस्तेऽनेकपार्श्वाय नमस्ते दिव्यतेजसे ॥4॥

अनेकायुधयुक्ताय अनेक - सुरसेविने।
अनेक – गुणयुक्ताय महादेवाय ते नमः ॥5॥

नमो दारिद्र्यकालाय महासम्पत्प्रदायिने।
श्रीभैरवी-संयुक्ताय त्रिलोकेशाय ते नमः॥6॥

दिगम्बर नमस्तुभ्यं दिव्याङ्गाय नमो नमः।
नमोऽस्तु दैत्यकालाय पापकालाय ते नमः॥7॥

सर्वज्ञाय नमस्तुभ्यं नमस्ते दिव्यचक्षुषे।
अजिताय नमस्तुभ्यं जितामित्राय ते नमः॥8॥

नमस्ते रुद्ररूपाय महावीराय ते नमः।
नमोऽस्त्वनन्तवीर्याय महाघोराय ते नमः॥9॥

नमस्ते घोरघोराय विश्वघोराय ते नमः।
नमः उग्राय शान्ताय भक्तानां शान्तिदायिने॥10॥

गुरवे सर्वलोकानां नमः प्रणवरूपिणे।
नमस्ते वाग्भवाख्याय दीर्घकामाय ते नमः॥11॥

नमस्ते कामराजाय योषित्कामाय ते नमः।
दीर्घमायास्वरूपाय महामायाय ते नमः॥12॥

सृष्टिमाया-स्वरूपाय विसर्गसमयाय ते।
सुरलोक-सुपूज्याय आपदुद्धारणाय च ॥13॥

नमो नमो भैरवाय महादारिद्र्यनाशिने।
उन्मूलने कर्मठाय अलक्ष्म्याः सर्वदा नमः॥14॥

नमोऽजामलबद्धाय नमो लोकेश्वराय ते।
स्वर्णाकर्षणशीलाय भैरवाय नमो नमः॥15॥

मम दारिद्र्य-विद्वेषणाय लक्ष्याय ते नमः।
नमो लोकत्रयेशाय स्वानन्द - निहिताय ते ॥16॥

नमः श्रीबीजरूपाय सर्वकामप्रदायिने।
नमः महाभैरवाय श्रीभैरव नमो नमः ॥17॥

धनाध्यक्ष नमस्तुभ्यं शरण्याय नमो नमः।
नमः प्रसन्नरूपाय आदिदेवाय ते नमः ॥18॥

नमस्ते मन्त्ररूपाय नमस्ते रत्नरूपिणे।
नमस्ते स्वर्णरूपाय सुवर्णाय नमो नमः॥19॥

नमः सुवर्णवर्णाय महापुण्याय ते नमः।
नमः शुद्धाय बुद्धाय नमः संसारतारिणे॥20॥

नमो देवाय गुह्याय प्रचलाय नमो नमः।
नमस्ते बालरूपाय परेषां बलनाशिने ॥21॥

नमस्ते स्वर्णसंस्थाय नमो भूतलवासिने।
नमः पातालवासाय अनाधाराय ते नमः॥22॥

नमो नमस्ते शान्ताय अनन्ताय नमो नमः।
द्विभुजाय नमस्तुभ्यं भुजत्रयसुशोभिने॥23॥

नमोऽणिमादि – सिद्धाय स्वर्णहस्ताय ते नमः।
पूर्णचन्द्र-प्रतीकाशवदनाम्भोज – शोभिने ॥24॥

नमस्तेऽस्तु स्वरूपाय स्वर्णालङ्कारशोभिने।
नमः स्वर्णाकर्षणाय स्वर्णाभाय नमो नमः॥25॥

नमस्ते स्वर्णकण्ठाय स्वर्णाभाम्बरधारिणे।
स्वर्णसिंहासनस्थाय स्वर्णपादाय ते नमः॥26॥

नमः स्वर्णाभपादाय स्वर्णकाञ्चीसुशोभिने।
नमस्ते स्वर्णजङ्घाय भक्तकामदुघात्मने॥27॥

नमस्ते स्वर्णभक्ताय कल्पवृक्षस्वरूपिणे।
चिन्तामणिस्वरूपाय नमो ब्रह्मादि–सेविने॥28॥

कल्पद्रुमाधःसंस्थाय बहुस्वर्ण – प्रदायिने।
नमो हेमाकर्षणाय भैरवाय नमो नमः ॥29॥

स्तवेनानेन सन्तुष्टो भव लोकेश भैरव।
पश्य मां करुणादृष्ट्या शरणागतवत्सल ॥30॥

फलश्रुति

श्रीमहाभैरवस्येदं स्तोत्रमुक्तं सुदुर्लभम्।
मन्त्रात्मकं महापुण्यं सर्वैश्वर्य-प्रदायकम्॥31॥

यः पठेन्नित्यमेकाग्रं पातकैः स प्रमुच्यते।
लभते महतीं लक्ष्मीमष्टैश्वर्यमवाप्नुयात् ॥32॥

चिन्तामणिमवाप्नोति धेनुं कल्पतरुं ध्रुवम्।
स्वर्णराशिमवाप्नोति शीघ्रमेव स मानवः ॥33॥

त्रिसन्ध्यं यः पठेत् स्तोत्रं दशावृत्त्या नरोत्तमः।
स्वप्ने श्रीभैरवस्तस्य साक्षाद् भूत्वा जगद्गुरुः॥34॥

स्वर्णराशि ददात्यस्मै तत्क्षणं नास्ति संशयः।
अष्टावृत्त्या पठेद् यस्तु सन्ध्यायां व नरोत्तमः।।35।।

लभते सकलान् कामान् सप्ताहान्नात्र संशयः।
सर्वदा यः पठेत् स्तोत्र भैरवस्य महात्मनः।।36।।

लोकत्रयं वशीकुर्यादचलां श्रियमाप्नुयात्।
न भयं विद्यते क्वापि विषभूतादि-सम्भवम्।।37।।

म्रियन्ते शत्रवस्तस्य ह्यलक्ष्मी नाशमाप्नुयात्।
अक्षयं लभते सौख्यं सर्वदा मानवोत्तमः।।38।।

अष्टपञ्चाद् वर्णाढ्यो मन्त्रराजः प्रकीर्तितः।
दारिद्र्यदुःखशमनः स्वर्णाकर्षण-कारकः ।।39।।

य एनं सञ्जपेद् धीमान् स्तोत्रं वा प्रपठेत् सदा।
महाभैरव-सायुज्यं सोऽन्तकाले लभेद् ध्रुवम्।।40।।

इति श्रीरुद्रयामले तन्त्रे ईश्वर-दत्तात्रेयसंवादे
'स्वर्णाकर्षण-भैरवस्तोत्रं' सम्पूर्णम्।।

इस फलश्रुवि का सार यह है कि – महाभैरव का यह स्तोत्र अति दुर्लभ है, मन्त्रात्मक, महापुण्य एवं सर्वऐश्वर्य का दाता है। इसके एकाग्र-एकान्त में पाठ से पाप-मुक्ति, महान लक्ष्मी, चिन्तामणि-कामधेनु-कल्पतरु के समान अष्ट ऐश्वर्य तथा शीघ्र ही स्वर्णराशि की प्राप्ति होती है। त्रिकाल दस पाठ करने से स्वप्न में साक्षाद् भैरव भगवान् जगद्गुरु पधारकर तत्काल स्वर्णराशि-प्रदान करते हैं। प्रतिदिन आठ आवृत्ति करने से साधक एक सप्ताह में ही इच्छित फल प्राप्त करता है। नित्य पाठ से सर्व वशीकरण, अचल लक्ष्मीप्राप्ति, भयनाश, शत्रुनाश, दारिद्र्यनाश, अक्षय सौख्य प्राप्त होते हैं। इसका मन्त्र अठावन अक्षरों का है जो दारिद्र्यनिवार, तथा स्वर्णाकर्षण कारक है। इस मन्त्र का जप तथा स्तोत्र-पाठ अन्त में सायुज्य प्रदान करते हैं।

श्रीपक्षिराज-शरभेश्वर
आकाशभैरव-साधना

पुराणों में यह प्रसिद्ध है कि—ब्रह्मा, विष्णु और शिव आदि देवताओं के समय- समय पर अनेक अवतार होते रहते है। इन अवतारों में ब्रह्मा और शिव के अवतारों की संख्या कम है जबकि भगवान् विष्णु के अवतारों की संख्या अधिक है। इसी प्रकार भगवती के अवतारों की संख्या भी बहुत अधिक प्रतीत होती है।

भगवान् विष्णु के अवतारों में हिरण्यकशिपु के वध और भक्तवर प्रहलाद की सुरक्षा के लिए 'श्रीनृसिंह' का अवतार अपने ढंग का अनूठा

अवतार है। श्रीमद्भगवत के सप्तम स्कन्ध के आठवें अध्याय में वर्णन आता है कि–

सत्यं विधातुं निजभृत्यभाषितं, व्याप्तिं च भूतेष्वखिलेषु चात्मनः।
अदृश्यताद्भुतरूपमुद्वहन्, स्तम्भे सभायां न मृगं न मानुषम् ।।18।।

स सत्त्वमेनं परितोऽपि पश्यन्, स्तम्भस्य मध्यादनु निर्जिहानम्।
नायं मृगो नापि नरो विचित्रमहो किमेतन्मृगेन्द्ररूपम्।।19।।

मीमांसमानस्य समुत्थितोऽग्रतो, नृसिंहरूपस्तदलं भयानकम्।
प्रतप्तचामीकरचण्डलोचनं, स्फुरत्सटाकेसरजृम्भिताननम्।।20।।

कारलदंष्ट्रं करवालचञ्चलक्षुरान्तजिह्वं भृकुटीमुखोल्बणम्।
स्तब्धोर्ध्वकर्ण गिरिकन्दराद्भुतव्यात्तास्यनासं हनुभेदभीषणम्।।21।।

दिविस्पृशत्कायमदीर्घ-पीवर-ग्रीवोरुवक्षः-स्थलमल्पमध्यम्।
चन्द्रांशुगौरैश्छुरितं तनूरुहैर्विष्वग्भुजानीकशतं नखायुधम्।।22।।

अपने भक्त के कथन–'मेरा प्रभु सर्वत्र व्याप्त हैं' – को सत्य सिद्ध करने के लिए अत्यन्त अद्भुत रूप को धारण किये हुए न सिंह और न पुरुष अपितु नरसिंह के रूप में, सभा में स्थित स्तम्भ में प्रभु दिखाई दिये। जिसे देखकर सभी आश्चर्य में डूब गये। यह कैसा विचित्र रूप है, न सिंह है, न पुरुष। इस प्रकार विचार ही कर रहे थे कि अत्यन्त भयानक, तपे हुए सोने के समान चमकीली आंखों वाले, सुनहरी रोमावली से युक्त मुंह फैलाये हुए, कराल दाढ़ें, तीक्ष्ण जिह्वा, भयंकर भौहें, कान खड़े किये हुए, पर्वत की गुफा के समान गहरी नासिका से युक्त, भीषण ठोड़ी, आकाश को स्पर्श करते हुए विशाल शरीर, छोटी किन्तु सुदृढ़ ग्रीवा वाला विशाल वक्षःस्थल, कृश कटि, भूरे-भूरे बालों वाले तथा अत्यन्त कठोर नखों से युक्त भगवान् श्री नृसिंह प्रकट हुए।

इस प्रकार का अपूर्व अवतार लेने के कारण तथा परम पराक्रमी राक्षसराज का विनाश करने के कारण विष्णु के मन में अहम्भाव जागा। साथ ही क्रोध का आवेग भी पराकाष्ठा पर पहुंच चुका था। अनेकविध स्तुतियां हो रही थीं। सभी देवगण चिन्तित थे कि क्रोध का शमन कैसे हो? अन्ततः भगवान् शिव ने इसका समाधान सोच लिया और उसी समय एक विचित्र पक्षी का रूप धारण किया और अपने पंजों से भगवान् नृसिंह को उठाकर उड़ गये। आकाश में उड़ते हुए उन्होंने इतना भीषण चक्कर लगाया कि सारा ब्रह्माण्ड प्रलयकाल के समान डोलता प्रतीत हुआ। नृसिंह अपने क्रोध को भूलकर स्वयं आश्चर्य में पड़ गये कि यह क्या हुआ? कैसे हुआ? और कुछ समय बाद उन्हें पृथ्वी पर सब देवताओं के समक्ष लाकर छोड़ दिया और भगवान् नृसिंह का क्रोध धीरे-धीरे शान्त हो गया।

इस असामयिक घटना से वातावरण ही बदल गया। तभी देवताओं ने भगवान् शरभ को देखा। उनका स्वरूप उस समय कैसा था, यह निम्नलिखित ध्यान से ज्ञातव्य है–

चन्द्रार्काग्निस्त्रिदृष्टिः कुलिशवरनखश्चञ्चलोऽत्युग्रजिह्वः,
काली दुर्गा च पक्षौ हृदयजठरगो भैरवो वाडवाग्निः।
ऊरुस्थौ व्याधिमृत्यू शरभवरखगश्चण्डवातातिवेगः,
संहर्ता सर्वशत्रून् स जयति शरभः सालुवः पक्षिराजः॥[1]

चन्द्र, सूर्य और अग्निरूप तीन नेत्र वाले, वज्र के समान नख वाले, अत्यन्त उग्र एवं चञ्चल जीभ वाले, जिसके दोनों पंख काली और दुर्गा से युक्त हैं, हृदय और उदर भाग में प्रलयकाल की अग्नि व्याप्त है, दोनों जङ्घाओं पर व्याधि और मृत्यु बैठे हुए हैं जिसके उड़ने की गति प्रचण्ड वायु के वेगवाली है, ऐसा सर्व शत्रुओं का संहारक श्रेष्ठ शरभ- पक्षीरूप, 'शरभ, सालुव और पक्षिराज' नाम से अभिहित सर्वोत्कर्षशाली है– उसकी जय हो ।

अन्य स्तुति-पद्यों में भी–"ज्वलनकुटिलकेश, रक्तपानोन्मद, पञ्चानन, कलंकिचूड, भुजङ्गभूषण, दिगम्बर, वज्रदंष्ट्र, वज्रनख, अनेकभुज, अष्टचरण,

1. आकाश भैरव-कल्प 16 अध्याय तथा निग्रह-दारुण-सप्तक-स्तोत्र।

चतुर्थशुक, मृगाङ्गलाङ्गूल, सुचञ्चु, सहस्त्रांशुशतप्रकाश, सपक्षिसिंहाकृति, प्रेतवाहन; शङ्खध्वनि तथा अप्रतिहतगति'' आदि विशेषणों से इनकी स्तुति की गई है। तन्त्रशास्त्रों में श्रीशरभ का स्वरूप वर्णन करते हुए स्थान-स्थान पर इन्हें-''श्मशानरुद्र, प्रलयकालाग्निरुद्र, नील-भैरव, उग्रभैरव, महाभैरव'' आदि नामों से व्यक्त करते हुए सर्वकर्मसाधक तथा रिपुदर्प-दमन के लिये पूज्य बताया गया है।

नृसिंहक्षोभनिवारणरूप कर्म का स्मरण दिलाते हुए प्रार्थना में कहा गया है कि-

कनक-जठरगोद्यद् रक्तपानोन्मदेन,
प्रथित-निखिल-पीडा नारसिंहेन जाता।
शरभवर शिवेश! त्राहि नः सर्वपापा-
दनिशमिह कृपाब्धे सालुवेश-प्रभो त्वम्।।

तथा-

दंष्ट्रानखाढ्यः शरभः सपक्षश्चतुर्भुजश्चाष्टपदः सहेतिः।
कटीर-गङ्गेन्दुधरो नृसिंक्षोभापहो मद् रिपुहास्तु शम्भुः ।।

हङ्कारी शरभेश्वरोऽष्टचरणः पक्षी चतुर्थः शुकः,
पादाकृष्ट-नृसिंहविग्रहधरः कालाग्निकोटिर्यती।
विश्वक्षोभकरः सहेतिरनिशं ब्रह्मेन्द्रमुख्यैः 'स्तुतो,
गङ्गा-चन्द्रधरः पुरत्रयहरः सद्योरिहन्ताऽस्तु नः।।

नृसिंहमृत्यून्नतदिव्यतेजः प्रकाशितं दानव-भङ्ग-दक्षम्।
प्रशान्तिमन्तं विदधाति योमं सोऽस्मानपायाच्छरभेश्वरोऽव्यात्।।
योऽभूत् सहस्त्रांशु-शत-प्रकाशः, सपक्षिसिंहाकृतिरष्टपादः।
नृसिंहसंक्षोभ-शमात्तरूपः पायादपायाच्छरभेश्वरो माम्।

'आकाश भैरव-कल्प' में कहा गया है कि- भगवान् भैरव ने लोकरक्षा के लिये अपने स्वरूप को ही यथासमय तीन रूपों में क्रमशः प्रकट किया ।

– श्रीश्वर उवाच –

रहस्यं शृणु वक्ष्यामि भैरवस्य महात्मनः।
सर्वलोकैकरक्षार्थं तव देवेशि! तत्त्वतः॥ 2॥

कदाचिल्लाकरक्षार्थं लीलयाकाश-भैरवः।
त्रिधा विभज्य स्वात्मानमधिष्ठाय जगत् स्थितः॥ 3॥

आकाशभैरवं पूर्वं द्वितीयं त्वाशुगारुडम्।
शारभं तु तृतीयं स्यादिति रूपत्रयं कमात्॥ 4॥

इस प्रकार 1–आकाश भैरव, 2–आशुगरुड़ तथा 3– शरभ ये तीनों रूप श्रीभैरव के ही हैं तथा इनमें भी तीसरे स्वरूप शरभेश्वर के पुनः तीन रूप व्यक्त हुए–

तत्र तार्तीयरूपस्य त्रिधारूपं विशेषतः।
शरभं सालुवं चैव पक्षिराजमतः परम् ॥ 214॥

भगवान् शरभ-भैरव परम दयालु हैं । ये अपने भक्त की ही नहीं, अपितु अन्य देवताओं के भक्तों को कष्ट पहुंचाने वाले जो शत्रु हैं, उनका भी नाश करने के लिए तत्पर रहते हैं। 'ललितासहस्त्रनाम' की फलश्रुति में कहा गया है।

यस्त्विदं नामसाहस्त्रं सकृत् पठति भक्तिमान्।
तस्य ये शत्रवस्तेषां निहन्ता शरभेश्वरः॥267॥

ऐसे अद्‌भुत पराक्रमी श्रीशरभेश्वर की उपासना यद्यपि विरले भक्त ही कर पाते हैं तथापि इनके उपासक की आकांक्षाओं की पूर्ति सभी देव पहले ही कर देते हैं। वाराणसी में एक ब्राह्मंण श्रीशरभ के उपासक थे। उनकी प्रतिज्ञा थी कि वे किसी से न तो कुछ मांगते थे और न दान ही लेते थे और सदा उपासना में ही लगे रहते थे। इसके कारण दरिद्रता का उनके यहां सम्राज्य था। एक बार दुःखित होकर उनकी पत्नी ने उनसे भला-बुरा कहा और साथ ही यह भी कह दिया कि–'तुम्हारा इष्टदेव कैसा है कि मेरे बालकों की भूख भी नहीं मिटा सकता?'' इस कथन से खिन्न होकर ब्राह्मणदेव घर से निकले और सोचा भगवान् विष्णु लक्ष्मीपति हैं, अतः उनसे प्रार्थना करूं। पास ही लक्ष्मी–नृसिंह भगवान् का मन्दिर था,

वहां वे गये और मूर्ति के सामने खड़े हो गये। अपनी अयाचक-वृत्ति के कारण वे कुछ बोल नहीं पाये। किन्तु उनके तेजोमय भक्तिभाव से शालिग्रामजी की शिलामूर्ति पर स्वयं पानी बहने लगा, जो कि भय के कारण पसीना बह रहा था। और तत्काल नृसिंह भगवान् ने पुजारी को आज्ञा दी कि "इस ब्राह्मण को मेरे सामने से हटाओ, इसके घर 500 मुद्राएँ अभी पहुंचाओ तथा भविष्य के लिए इनकी पूरी व्यवस्था करो।" इत्यादि। यह कुछ वर्ष पूर्व की ही सत्य घटना है जिसे हमने वहीं के परम साधक महानुभाव श्री अमृतवाग्भवाचार्यजी महाराज से सुनी है।

श्रीशरभेश्वर-मन्त्र-विधान एवं स्तोत्र

श्रीशरभेश्वर भैरव की उपासना के लिए हम यहां संक्षेप में मन्त्र-विधान एवं पाठ के लिए एक स्तोत्र दे रहे हैं जो इस प्रकार हैं—

विनियोग—

अस्य श्रीशरभेश्वर-मन्त्रस्य वामदेवऋषिः अतिजगतीछन्दः श्रीशरभो देवता ॐ खं बीजं स्वाहा शक्तिः मम कार्यसिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यासः-

ॐ वामदेवऋषये नमः (शिरसि), **ॐ अतिजगतीच्छन्दसे नमः** (मुखे), **ॐ श्रीशरभेश्वरदेवतायै नमः** (हृदये), **ॐ खं बीजाय नमः** (गुह्ये), **स्वाहा शक्तये नमः** (पादयोः) **विनियोगाय नमः** (सर्वाङ्गे)।

करहृदयादिन्यासाः—

	(पहलीबार)	(दूसरीबार)
ॐ खें खां खं फट्—	अंगुष्ठाभ्यां नमः	हृदयाय नमः
प्राणग्रहसि प्राणग्रहसि हुं फट्	तर्जनीभ्यां नमः	शिरसे स्वाहा
सर्वशत्रुसंहारकाय	मध्यमाभ्यां नमः	शिखायै वषट्
शरभसालुवाय	अनामिकाभ्यां नमः	कवचाय हुम्
पक्षिराजाय	कनिष्ठिकाभ्यां नमः	नेत्रत्रयाय वौषट्
हुं फट् स्वाहा	करतलकरपृष्ठाभ्यां नमः	अस्त्राय फट्

ध्यानम्- **मृगस्त्वर्धशरीरेण पक्षाभ्यां चञ्चुना द्विजः।**
घोरवक्त्रश्चतुष्पाद ऊर्ध्वनेत्रश्चतर्भुजः॥

कालान्तदहनः पुण्यो नीलजीमूतनिस्वनः।
अरिस्तद्दर्शनादेव विनष्टबलविक्रमः॥
सटाछटोग्ररूपाय पक्षविक्षिप्तभूभृते।
अष्टपादाय रुद्राय नमः शरभमूर्तये॥

अथवा–

चन्द्रार्काग्निस्त्रिदृष्टिः कुलिशवरनखश्चञ्चलोत्युग्रजिह्वः,
काली दुर्गाच पक्षौ हृदयजठरगौ भैरवो जाठराग्निः।
ऊरुस्थौ व्याधिमृत्यू शरभवरखगश्चण्डवातातिवेगः,
संहर्त्ता सर्वशत्रून् स जयति शरभः सालुवः पक्षिराजः॥

इस प्रकार ध्यान करके निम्नलिखित मन्त्र का जप करें–

ॐ खें खां फट् प्राणग्रहसि प्राणग्रहसि हुं फट् सर्वशत्रुसंहारकाय शरभसालुवाय पक्षिराजाय हुं फट् स्वाहा।

एक अन्य मन्त्र इस प्रकार भी है–

ॐ नमोऽष्टपादाय सहस्त्रबाहवे द्विशिरसे त्रिनेत्राय द्विपक्षायाग्निवर्णाय मृगविहङ्गरूपाय वीरशरभेश्वराय ॐ।

जप के पश्चात् स्तोत्र अथवा केवल स्तोत्र का पाठ भी किया जा सकता है।

निग्रह-दारुण-सप्तकम्

कोपोद्रेकाति-निर्यन् निखिलपरिचरत् ताम्रभारप्रभूतं,
ज्वालामालाग्रदग्धस्मरतनुसकलं त्वामहं शालुवेश!
याचे त्वत्पादपद्मप्रणिहितमनसं द्वेष्टि मां यः क्रियाभि–
स्तस्य प्राणप्रयाणं परशिव भवतः शूलभिन्नस्य तूर्णम् ॥1॥

शम्भो ! त्वद्धस्तकान्तक्षतरिपुहृदयान्निःस्त्रवल्लोहितौघं,
पीत्वा पीत्वातिदीर्घादिशि- दिशिविचरास्त्वद्गणाश्चण्डमुख्याः।
गर्जन्तु क्षिप्रवेगा निखिलजयकरा भीकराः खेललोलाः,
सन्त्रस्ता ब्रह्मदेवाः शरभ खगपते ! त्राहि नः शालुवेश ॥2॥

सर्वाद्यं सर्वनिष्ठं सकलभयहरं त्वत्स्वरूपं हिरण्यं,
याचेऽहं त्वाममोघं परिकरसहितं द्वेष्टि मां यः क्रियाभिः।
श्रीशम्भो त्वत्कराब्जस्थितकुलिशवराघातवक्षःस्थलस्य,
प्राणाः प्रेतेशदूत ग्रहगणपरिखाः कोशपूर्व प्रयान्तु ॥3॥

द्विष्मः क्षोण्यां वयं यॉंस्तव पदकमलध्याननिर्धूतापाः,
कृत्याकृत्यैर्विमुक्ता विहगकुलपते ! खेलया बद्धमूर्ते।
तूर्णं त्वत्पादपद्मप्रधृतपरशुना तुण्डखण्डी-कृताङ्ग-
स्तद्द्वेषी यातु याम्यं पुरमतिकुलषं कालपाशाग्रबद्धः॥4॥

भीमश्रीशालुवेश ! प्रणतभयहर प्राणजिद् दुर्मदानां,
याचेऽहं चास्य वर्गप्रशमनमिह ते स्वेच्छया बद्धमूर्ते।
त्वामेवाशु त्वदङ्घ्र्यष्टकनखविलसद्ग्रीवजिह्वोदरस्य,
प्राणा यान्तु प्रयाणं प्रकटितहृदयस्यायुरल्पायतेश ॥5॥

श्रीशूलं ते कराग्रस्थितमुसलगदावृत्तवात्याभिघाताद्,
यातायातारियूथं त्रिदशरविघनोद्भूतरक्तच्छटार्द्रम्।
सद्दृष्ट्वाऽऽयोधने ज्यामखिलसुरगणाश्चाशु नन्दन्तु नाना-
भूता वेतालपूगः पिबतु तदखिलं प्रीतचित्तः प्रमत्तः॥6॥

अल्पं दोर्दण्उवाहुप्रकटितविनमच्चण्डकोदण्डमुक्तै-
र्बाणैर्दिव्यैरनेकैः शिथिलितवपुषः क्षीणकोलाहलस्य।
तस्य प्राणावसानं परशरभ विभोऽहंत्वदिज्या-प्रभावै
स्तूर्णं पश्यामि यो मां परिहसति सदा त्वादिमध्यान्तहेतोः॥7॥

इति निशि प्रयतस्तु निरासनो मममुखः शिवभवमनुस्मरन्।
प्रतिदिनं दशवारदिनत्रयं जपति निग्रह-दारुणसप्तकम्॥8॥
इति गुह्यं महाबीजं परमं रिपुनाशनम्।
भानुवारं समारभ्य मङ्गलान्तं जंपेत् सुधीः॥9॥

इत्याकाशभैरव-कल्पे प्रत्यक्षसिद्धिप्रदे नरसिंहकृता शरभस्तुतिः॥

पायाद् श्रीशरभेश्वरः

रुद्रः पिङ्गल-कुन्तलस्त्रिनयनोऽत्युग्रः सपक्षो हरिः,
सर्पालङ्करणस्तथाऽष्टचरणस्तुर्यः शुकः सालुवः।
क्षोभं श्रीनरसिंहजं शमयितुं नीतावतारी हरः
पायाद् श्रीशरभेश्वरो विहगराट् सर्वार्थदः शङ्करः॥
काली दुर्गा पक्षयोर्यस्य संस्थे, स्वान्ते साक्षत् सुंदरीराजमाना।
क्षोभं यातः श्रीनृसिहो यतस्तं, देवे भीमं सालुवाख्यं नमामः॥

– रुद्रस्य

श्रीशरभ-सालुव-पक्षिराज के इन मंत्रों के अतिरिक्त अन्य अनेक मन्त्र प्राप्त होते हैं। जिनमें पूजामंत्र पूजा के लिए हैं, जबकि अन्य मंत्र तान्त्रिक प्रयोगों की दृष्टि से बनाकर उपयोग में लाये जाते हैं और उनसे सभी कार्यों की सिद्धि प्राप्त होती है। विस्तार अधिक हो जाने के कारण हमने यहां संक्षिप्त सूचन ही किया है। विशेष के लिए 'प्रपञ्चसारसंग्रह' तथा 'आकाशभैरवकल्प' देखें।

श्री वटुक पटल में भगवान शिव कहते हैं -
हे पार्वती! मैंने प्राणियों को सर्वाधिक सुख देने वाला वटुक रूप धारण किया है। अन्य देवता तो समय आने पर फल देते हैं किन्तु भैरव तो सेवित होने पर तत्काल प्रसन्न होते हैं।

शास्त्रीय विधि के अनुसार कोई भी साधक सरलता मे उपासना कर सके इसलिए विद्वान लेखक ने साधना के प्रत्येक पक्ष को सरल एवं सुबोध भाषा में समझाया है। अत्यन्त प्रमाणिक रूप से भैरव के विभिन्न अवतारों के परिचय के साथ अचूक मंत्रो, यंत्रों एवं तंत्र-प्रयोगों की सहायता से दैनिक जीवन की विषमताओं के समाधन तथा इच्छित कामनाओं की पूर्ति हेतु सरल मार्ग के प्रस्तुतीकरण की दृष्टि से साधना के गुप्त रहस्यों का ज्ञान कराया है।

गुरु गणपति स्मरण से मातृकान्यास तक की सम्पूर्ण विधि आपदुद्धारक वटुक भैरव के अष्टोत्तर नाम की महिमा मूलपाठ, पाठ करने के तांत्रिक प्रकार, त्रिकपाठ, लोम-विलोम पाठ, कवच, सहस्त्रनाम, भैरव दीपदान विधि का अनूठा संग्रह किया गया है।

अघोर भट्टद्धारक स्वच्छद भैरव, श्री स्वर्णाकर्षण भैरव तथा श्री शरभेश्वर भैरव से सम्बन्धित साहित्य का संकलन पुस्तक की विशिष्ट उपलब्धि है।

मेघ प्रकाशन

239, दरीबाकलां, चांदनी चौक, दिल्ली-110006
मो.- 9811532102
ई-मेल - meghprakashan@gmail.com